धोः त्वं सोमलक्षणमद्यं मदनीयं केयभूतं यस्य सोमस्य हे देव दधिषे धारयसि पूर्वपेयं प्रथमवषट्कार
लक्षणं पूर्वपानं प्रथमवषट्कार एव ते सोमस्य राजन् इत्याशयः वायवे त्वेति देवतादेशः द्वितीया पुरोरुक्
इन्द्रवायू ऐन्द्रवायवी गायत्री हे इन्द्रवायू इमे अभिषुताः सोमाः अतः कारणात् उप प्रयोभिरागतं उपेत्यय
मुपसर्गः आगतमित्यनेन संबध्यते उपागतं उपागच्छतं प्रयोभिः प्रयशब्दः इणगतावित्यस्य धातोः शत
प्रत्ययान्तस्य इणो यणिति मित्यनेन संबध्यते उपागतं उपा) यणादेशो भिस् तत्र लकारस्य छान्दसः सका
रः ततो रुत्वादि ततः प्रपूर्वस्याप्रियोभिरिति सिध्यति प्रयद्भिरश्वैः शीघ्रैरागच्छतं किंच इन्दवो वामुशन्ति
हि हि शब्दो यस्मादर्थे यस्मादिन्दवः सोमाः वां युवामुशन्ति वशकान्तौ कामयन्ते यदस्मानिन्द्रवायू पिवत
इति उपयामगृहीतोसि वायवे इन्द्रवायुभ्यां त्वा गृह्णामीति शेषः सादयति एषते योनिः एष पृथिवीलक्षण
स्ते तव योनिः स्थानं योनिशब्दो हि स्थानवचनः सजोषोभ्यां सह प्रीतिभ्यां त्वा सादयामीति शेषः मैत्राव
रुणस्य पुरोरुक् अयं वां गायत्री मैत्रावरुणी हे मित्रावरुणौ अयं वां युवयोः अभिषुतः सोमः आस्ते
ऋतस्य भौवादिके ऋताहृधौ सत्यवाहौ हृधौ वा अतः कारणात् ममेदिह श्रुतं हवं इदिति नियातनं पदार्थे ममेव इह
यजमानानां मध्ये मे एतं आह्वानं उपयामगृहीतोसि मित्रावरुणाभ्यां सह प्रीतिभ्यां त्वा सादयामी

57

५८

ति शेषः देवतादेशः पयसा श्रीणाति रायावयम् मैत्रावरुणी त्रिष्टुप् उपरितने ऽर्द्धर्चे तदः श्रवणादिह यदो
ध्याहारः इष्टकामदुघा प्रार्थ्यते मंत्रदृक् यया धेन्वा गृहेऽस्माकं रायावयं ससवांसो मदेम रायाधनेन वयं
ससवांसः वनषण संभक्तौ संभक्ताः संतो मदेम हृष्टाः स्यामः कथमिव हव्येन देवाः यथा हविषा संभ
क्ता देवा हृष्यन्ति यथा यवसेना वाह्निकादिना गावः हृष्टा भवन्ति तां तथाभूतां धेनुं हे मित्रावरुणौ युवं यु
वां नः अस्मभ्यं विश्वाहा सर्वदा धत्तं दत्तं अनपस्फुरंती अनपस्फुरंती अनन्य स्फुरतिर्गत्यर्थः अपेत्याप
त्यया पुरुषान्तरं गच्छति सा अपस्फुरंती न अपस्फुरंतीम् अनपस्फुरंतीं अनन्यगामिनी दत्तमित्यर्थः ॥
विश्वाहेति सततदानक्रियार्थं एष ते योनिः ऋतायुभ्यां त्वा सादयामीति शेषः ऋतशब्देनात्र मित्रावरुण
एव वायुरिति पदकारस्ताभिधीयते आयुः शब्देन वरुणः अयं तावदुक्त्यभिप्रायः येनैवमाह ब्रह्म
वा ऋतं ब्रह्म हि मित्रो ब्रह्मो ह्यृतं वरुण एव वायुरिति पदकारस्तु ऋतयुभ्यां इत्येवं पदं कृतवान् तस्या
यमभिप्रायः ऋतं सत्यं यज्ञं वा युकामयेते ता हृतायू ताभ्यामृतायुभ्यां आश्विनस्य पुरोरुक् यावांक
शा गायत्री आश्विनी हे अश्विनौ या वां युवयोः कशा कशेति वाङ्नाम सा प्रकाशयति सतो ऽर्थान् म
धुमती मधु ब्राह्मणोपनिषत् समायुक्ता सूनृतवती शोभना प्रिया ऋतावती सत्यवती च या वाक् सा
सूनृतावती तया यज्ञं मिमिक्षतं मिहसेचने सिंचतं अश्विनो ह्रियन्ते ऽध्वर्यू अत एवमुच्यते उपया
मगृहीतोस्यश्विभ्यां गृह्णामीति शेषः एष ते योनिर्माध्वीभ्यां त्वा सादयामि दध्यङ् ह वा आभ्यामाथर्व

णोमधुनामब्राह्मणमुवाचेत्युपक्रम्य तस्मान्मधुमत्त्वाद्गृह्णाति माध्वीभ्यां त्वेति सादयामीत्याहुरश्रुति ।
अत एवं व्याख्येयं मधुब्राह्मणं यो अधीयाते तौ माध्वीभ्यामित्युच्येते इकारोऽत्र तद्धितः । ॥ ऋचं गृह्णाति तस्य ऋ
षेरुक्तं नमलस्या जगती अतिच्छन्दाः प्रकारेणानुसोमस्तु ऋको अभिधीयते अत्र हि तेः पदेवीकं प्रायशः क
ल्पते हे सोम तमिन्द्रस्येष्टतानिं उत्कृष्टमतिं श्रेष्ठप्रशास्यं वर्हिषदं यज्ञेषु वर्हिषि सीदतीति वर्हिषदं स्वर्वि
दं स्वः शब्देन द्युलोको अभिधीयते द्युलोकं जानाति तत्र हि तस्य निवासः धुनिं धुनकंपने कंपयितारम् श
त्रूणां आशुं जयंतं शीघ्रं जयंतं जनेष्वानि वस्तूनि तमेवं गुणविशिष्टमिन्द्रं हे सोम यास्त्वं नु वर्हसे यास्तु दिव्य
येषु यजमानेषु वर्हसे पुनः पुनः संस्क्रियसे ताः स्तुताः स्तु क्रियास्तु तमवस्थितः तत्र मनीषी नहजनं दोहसे प्र
तीनमात्मनो अभिमुखं इन्द्रमव स्थाप्य स्ववीर्येण तर्पयित्वा अस्मै यजमानाय वृजनम् वृजनमिति धन
नामधनवद्युक्तं फलं दोहसे प्रक्षालयसि कथं पुनर्दोहसे प्रक्षालयसि कथं पुनर्दोहसे प्रत्नथा प्रत्नश
ब्दः पुराणवचनः याउपमार्थीयः चिरंतनानामिव ऋषीणां भृगुप्रभृतीनां अस्य यजमानस्य दोहसे पू
र्वथा पूर्वेषामिव ऋषीणां साध्यादीनि दोहसे विश्वथा सर्वेषामिव ऋषीणां ऋषिपुत्राणां च दोहसे इम
थाइदानीन्तनानामिव यजमानां दोहसे अस्य यजमानस्योपयामगृहीतोसि शण्डाय त्वा गृह्णामि शण्डे
ष्टरः एषते योनिर्वीरतां पाहि गोपाय सादयामीति शेषः स्फ्यशकलेनापमार्ष्टि अपमृष्टः
शण्डः अपमार्जनीकृतो स्य गृहस्य शण्डो स्तरः निष्क्रामति देवस्त्वा देवाः हे यद्दू शक्रयायिनः त्वां प्र

यंत यजतिस्थानंप्रापयतं दक्षिणस्यांवेदिश्रोण्यावासादयति अनाधृष्टासि अनुपाहिंसितासि ॥ यूपदेशं
गच्छति सुवीरोवीरान् हे गृह कल्याणवीरः सन्त्वंयजमानस्यवीरान् प्रजनयन् उत्पादयन् परि इहि प
रिगच्छ किंच अभिरायस्पोषेणयजमानंअभियोजयन् स्वधनस्पोषेणयजमानम् परीहीत्यनुवर्त
ते अपरेणयूपमटली संजग्मानो दिवा पृथिव्या संजग्मानः अयंशुक्रः संगच्छमानः दिवा द्युलोकेन सं
गच्छमानश्च पृथिव्याः पृथिवीलोकसंगच्छमानश्चकोः सोमशुक्रः शुक्रशोचिषा शुक्रदीप्त्यापविभ
निरतिशोषः यूपंशकलंनिरस्यतिनिरस्तः शंडः त्रिमः शंडोयत्तद्विहितः आहवनीयेप्रोक्षितंप्रास्य
ति शुक्रस्याधिष्ठानमसि शुक्रोग्रहः तस्याधिष्ठानंअधिकरणमसि जपति अच्छिन्नस्यते हे देव सोम
अच्छिन्नस्यसंततस्यानवखंडितस्यते नृवत्तुवीर्यस्यकल्याणप्रभवस्यरायस्पोषस्य ददितारोभवेम त्वत्प्र
सादात् भूयोभूयः करणयत्तस्यानवखंडितस्यते नवत्तवीर्यस्य कल्याणप्रभवस्य रायस्पोषस्य) सास्यैत
जुहोति साप्रथमा त्रिष्टुवंडी यस्येन्द्रस्य साप्रथमासंस्कृतिः सप्रथमः संस्कारः क्रियते सोमक्रयेसदितिदेवम
च्छेन्द्रायसोममिति कथंभूतासंस्कृतिः विश्ववाराविश्वे सर्वेयत्रसोमेव्रियनोऽथतिविमदेवेभ्यःसि विश्ववा
रणेति सोमेक्रीयमाणेयत्रजगदुत्पत्तिवीजत्वात् साविश्ववारा संस्कृतिः सचप्रथमोवरुणः सचप्रथमो
मित्रः सचप्रथमोऽग्निः यस्येद्रस्य अन्येषांदेवगणानांप्रभुः सचप्रथमोबृहस्पतिः चिकित्वान् चेतनावान्
उत्कृष्टधीस्तेषांमत्रिगणानायस्येन्द्रस्यतस्मेइंद्रायसुतमभिषुतंसोमंआजुहोत तारयतस्वाहाकारेणदे

ऋत्विजः जपति त्वंयंतद्रोणाः त्वपतं पत्नौ होत्राशब्देन होतृकार्याणि यान्याच्छंदांस्यभिधीयंते तथं तं होत्राः या
ज्याच्छंदांसि मधुनः मधुसोममिति यस्मिन्कर्मणि यते मधुस्वादयसोम स्थियाश्चित्रहाः याः शोभनमिष्टायाः सा
धुप्रीताः कथमेतत् ज्ञायत इति चेत् स्तुक्षुनायत स्वाहा साधुकृतमयस्मात्स्वाहाकारेण प्रत्त उ. उपविशति
प्रमाग्रीनग्ना यामीत प्रग्रीत पवें होतृराचष्टे मंथिनं गृह्णाति अयं वेनः सोमेनयात्रिष्टुभाधिदेवमधि
यत्तेवावस्थितः स्तूयते अधिदैवतावच्चंद्रात्मना संस्तूयते अयंवेनश्चोदयत्पृश्निगर्भाः वेनो वेनतेः का
न्तिकर्मणः अयं चंद्रमा चेनकांतः चोदयत् चोदसंचोदने प्रेरयति पृश्निगर्भाद्युलोकः पृश्निराविस्सोवास्य
धारणत्वात् द्युलोकगर्भा वा आदित्यगर्भा वाप्रापः ज्योतिर्जरायुः ज्योतिरस्य जरायुस्थानीयं भवति चंद्रमसः
रजसो विमाने उदकं रज उच्यते उदकस्य विनिर्माणकाले प्राप्ते ग्रीष्मांते इदानीमधियज्ञस्थितमुच्यते इ
ममेव च सोमसमपां च सूर्यस्य च संगमे गृहीताभिरद्भिर्वसतीवरीलक्षणाभिरभिषुतं संतं शिशुं न रिशिशुमि
व विप्रा मेधाविनो ब्राह्मणा मितिभिर्मीतिपूर्विकाभिः वाग्भिः रिहंति स्तुवंति स्तोत्रशास्त्रैः रिहतिर्हि अर्चति
कर्मसूपठितं वसतीवर्यश्चापः अपां संगमे सूर्यस्य संगमे संगृह्यंते तत्रैव पद्यंते तावस्पंदमानानां गृह्णी
यात् दिवा गृह्णीयादिति च उपयामगृहीतोसि मर्कायत्वा गृह्णामि मर्को अमरः सक्तभिः प्रीणाति मनो
नयेषु त्रिष्टुप् शुक्रामंथिप्रचाराधियज्ञानुवादिनी मनो नमन इव तिष्ठंतेषु हवनेषु सोमहोमेषु तिग्मतेषु ति
ग्मतेजते उत्साहकर्मणः उत्साहकृत्कविपः विपश्चितो मेधाविनो अध्वर्यवो क्वादसः प्रातिपदिकैकदेशलोपः

शखाशवीतिकर्मनाम कर्मणानिमित्तभूतेनतथः प्रथमपुरुषस्यस्थानेमध्यमपुरुषश्छांदसः वनुत :
व्याप्नुतोयुगपत् शुक्रामंथिग्रहौ इवेतागच्छतोतथैवहोमेष्वकर्त्तव्येषु आपःशर्पाभिस्तुविस्तुरगेअस्मा
श्रीणीतयोउध्वर्युराश्रीणीत शार्याभिरंगुलिभिःनविरमः नवीतिवज्रनाम नमाइतियन्नामवज्रथनो
महादक्षिणः असेतिग्रहनिर्देशः अस्यमंथिनःआश्रीणीतआदिशः प्रतिदिशंकावस्थितस्यसतः गम
स्तोयाणोयद्यध्वर्युआध्वर्युप्रतिप्रस्थातारौसमानकर्मणौ तथापियः श्रवणंकरोति सएवप्रधानइत्याश
यः पूषतेयानिःप्रजाःपाहियजमानसंबंधिनीः प्रजाःगोपाय एषशकलेनापमार्ष्टि अपमृष्टोमर्कःअ
पमार्जनीकृतोमर्कोसुरः निष्कामति देवाःत्वामंथिपाःप्रणयंतु यजतिस्थानंमंथीतियहनाम अना
धृष्टासितिनिर्विशेषपूर्वेणागच्छतिसुप्रजाःपतःत्वंसुप्रजाःहेमंथिन् अतस्त्वंप्रजायजमानस्यप्रजनय
नपरीहिपरिगच्छ किंच अभियोजयंयन्नस्यपोषेणयजमानंपरीहीत्यनुवर्त्तते अपरेणयपमरत्नीसं
यन्नःसंजग्मानः संगच्छमानोदिवाद्युलोकेनसंगच्छमानश्चपृथिव्यापृथिवीलोकेन कोमोमंथीमंथि
शोचिषाच मंथिनःशोचिर्दीप्तिःतेनमंथिशोचिषा संजग्मानइतिवर्त्तते एषतेशकप्रास्यति निरस्तोमर्को
सुरः आहवनीयेप्रास्यति मंथिनोधिष्ठानमसि मंथिग्रहः अधिष्ठानमधिकरणं आग्रयणंगृह्णाति
येदेवासः वैश्वदेवीत्रिष्टुप् ययूयंयेहदेवासः देवाएवदेवासः आज्जसेरसुक्छांदसः दिविद्युलोकेएका
दशस्थएकादशसंख्यायाभवथ पृथिव्यांअधि उपरिएकादशास्थ येचस्थयेअप्सुक्षितः अप्स्वंतरिक्षना

ऋ·मं·
त्रा·
६·

60

मरुत्पठितं क्षयतिर्निवासार्थः अंतरिक्षनिवासिनः महिम्नामहाभाग्येन एकादशस्थ महिम्नोनित्रिष्वा
पिस्थानेषुसेवध्यते सर्वत्रहिमहाभाग्यविशेषात् तेयूयंहेदेवाः यज्ञमिममाग्रयणलक्षणंजुषध्वं आसेवध्वं
उपयामगृहीतोसिव्याख्यातं आग्रयणोसीतिनाम्नासंबोधनंस्तुत्यर्थं नामधेयप्रतिलंभोस्य साधुक्रियायोगा
त् स्वाग्रयणः साधुराग्रयणः यस्मिंस्त्वयिगृहीतेअग्रेवाचः अयनमुत्सर्गः अध्वर्योः संजातः यस्त्वमेवंसाधुका
रीतंत्वांब्रवीमि पाहियज्ञंपाहित्वंयज्ञपतिंगोपायज्ञंगोपाययजमानं किंच विष्णुः त्वामिंद्रियेणपातु· विष्णुर्य
ज्ञस्याधिष्ठात्रीदेवतासः त्वामिंद्रियेणवीर्येणपातु विष्णुंत्वंपाहि त्वंच विष्णुंगोपाय अभिसवनानिपाहि अ
भितः सर्वतः सवनानिपाहि त्रीण्यपिसर्वेषुहिसवनेषुगृह्यते सोमः पवतेपवनइतिगतिकर्मसुपठितंगृ
ह्यपात्रेगच्छतिस्वकीयेकर्मणिप्रवर्तते अस्मैब्रह्मणेउत्पत्तिस्थित्यर्थंपवते अस्मैक्षत्राय पूर्ववद्याख्या अ
स्मैसुन्वतेयजमानाय कामप्राप्त्यर्थंपवते अस्मै[illegible] इषेऊर्जेअन्नायतदुपसेवनायचक्षीरादेः पवते अ
द्भ्यः ओषधीभ्यः पवतेअद्भ्योवृष्टिभ्यओषधीभ्योयवादिभ्यः उत्पत्तिस्थित्यर्थंपवतेद्यावापृथिवीभ्यांप्रीणना
यपवते सुभूतायपवते किंचाव्रजनोक्तेनसर्वस्मैसाधुभवनायपवतेविश्वेभ्यः त्वादेवेभ्यः देवतादेशः
एषतेयोनिर्विश्वेभ्यः त्वादेवेभ्यः सादयामीतिशेषः उपांशुंगृह्णाति उपयामगृहीतोसि इंद्रायत्वांगृह्णामी
तिसंबंधः कथंभूताय बृहद्वतेबृहदितिसामाभिप्रायं वयस्वतोविशिष्टयौवनलक्षणवीर्यसमेतं
सदाकालंवयोयस्मात् अथवाअन्नंतस्मैवयस्वते कथंभूतंत्वांगृह्णामि उक्थाव्यंउक्थानिमैत्रावरुणाद्या

६·

ह्मणाच्छंस्यच्छावाकसंबंधीतिगोपायतीत्युक्थ्यास्य तत्रग्रहस्यविनियोगः यद्यपितेनवहेइंद्रबृहद्वन्मद्वतऊर्जितवयो
यौवनलक्षणंतस्मैत्वांगृह्णामि अत्रचतेइंद्रेतियुष्मदामंत्रिताभ्यांश्रुत्यत्वत्तमिंद्रउच्यते त्वेतियुष्मदासीमो
पिश्रुत्यत्वदप्येवोच्यते तयोःसामर्थ्यंकथमितिचेत् यदस्मैइंद्रस्यपदस्यबृहद्वद्यस्तस्मैत्वांगृह्णामीतिपदद्व
यस्यव्यत्ययेनेतित्रमतेइन्द्रस्यपदस्यअस्येत्यनेनपदेनव्यत्ययः इंद्रइत्यस्यइंद्रस्येत्यनेनपदेनव्यत्ययःवि
ष्णवेयज्ञायचत्वांगृह्णामीतिशेषः एषतेयोनिः उक्थेभ्यस्त्वासादयामीतिशेषः उक्थ्यंविगृह्णाति दे
वेभ्यस्त्वादेवेभ्योऽर्थायत्वांदेवाव्यंदेवतर्प्पणं यज्ञस्यायुषे अनवच्छिन्नायाकस्मिकअंशरहितायपरिस
माप्तिर्यज्ञस्यायुः यज्ञस्यसमाप्तयेगृह्णामि यद्वायज्ञोयजमानस्यशरीरमितियजमानस्यायुराशा
स्यते उक्थ्यविग्रहणेषुद्वितीयोमंत्रविकल्पोमैत्रावरुणब्राह्मणाच्छंस्यच्छावाकानांयथासंख्यंमित्रा
वरुणाभ्यांत्वा इंद्रायत्वा इंद्राग्निभ्यांत्वाएवमादयोमंत्राःकाण्वः चरकाणांमंत्रविकल्पाः तत्रह
चरकाध्वर्यवोनापिगृह्णातिइत्यादिकयाश्रुत्याकण्वमंत्रपाठेनपवितास्त्युपेक्षिताः उक्थ्यादिषुत्रिती
यसवनेउक्थ्यविग्रहणेमंत्राः इंद्रावरुणाभ्यांत्वाइंद्राबृहस्पतिभ्यांत्वा इंद्राविष्णुभ्यांत्वा एतेपिकञ्ज
नवः ध्रुवंगृह्णाति मूर्द्धानंदिवः वैश्वानरीत्रिष्टुप्वैश्वानरश्चात्रसार्वात्म्यात्स्तूयते वैश्वानरमित्य
र्थंततनयन्तदेवाः मूर्द्धानंदिवोद्युलोकस्यसर्वात्मनाअवस्थितं मूर्द्धानंशिरःआहुःब्रह्मविदः
यंच अरतिंपृथिव्याःपृथिवीशब्देनात्रांतरिक्षमभिधीयते प्रदितंचैतदंतरिक्षनामसु एततस्त्रत

शु॰ मं
भा॰
६१

61

रितं आकाशं आपः पृथिवीति अरतिं अलमतिं पर्याप्तमतिं पृथिव्या अंतरिक्षलोकस्याहुः तत्र
प्रसैास्थितो यथाकालं हूयमानुसलति ऋतानि वैश्वानरमृत आजातमग्निं यं च वैश्वानरमृते यज्ञे आ
जातं उत्पन्नं अरण्योर्मथनात् अग्निमाहुः पंच कविं क्रान्तदर्शनमाहुः सम्राजं सम्यगैश्वर्येण युक्तं आ
हुः पंच अतिथिं जनानामाहुः विज्ञायते हि अग्निरतिथिरूपेण गृहान् प्रविशति तस्मात्तस्यो
दकमाहरंति आसन्ना पात्रं जनयंत देवाः योयमुक्तगुणो वैश्वानरस्तमासन् आस्यशब्दस्य पद्दन्न
इत्यादिना आसन् आदेशः सप्तम्या लुक् छान्दसो लोपः देवानां आसनि आस्यमेव आभिमुख्येन पा
त्रं पीयते अनेनेति पात्रं विज्ञायते हि चमसो देवपानं इति चमसेन हि वा एतेन देवा भक्षयंतीति ।
जनयंत देवा इन्द्रादयः उपयामगृहीतोसि ध्रुवोसि नाम्ना क्रियासमेतं प्रसस्ता ध्रुवक्षिति ध्रुवाणां
क्षितिः क्षितिर्वासगतेः ध्रुवाणामपि त्वं ध्रुवक्षितिः ध्रुवनिवासः ध्रुवतमोऽच्युतानां अच्युता
नामपि त्वमेव ध्रुवतमः अच्युतक्षित्तमः अच्युते क्षितं त्वच्युतक्षित् अतिशयेनाच्युतक्षित् अ
च्युतक्षित्तमः सादयति एष ते योनिः वैश्वानराय त्वा सादयामीति शेषः ध्रुवं निनयति ध्रुवं
ध्रुवेणो बृहत्यौ पूर्वार्धर्चः ध्रुवदेवत्यः उत्तर ऐन्द्रः ध्रुवं त्वामवसिच्यते द्वादशशस्त्र्यवसानः अ
ष्यनः अस्माकं अवसिक्तः सोमानां इद् इत् शब्द एवार्थे इद्इत्व विशः मनुष्यान् असपत्नान् स
पत्नरहितान् समनसः समनस्कान् ध्यानयुक्तान् करत् करोतु विश्वेषां होमः यस्त इध्मः सो

६१

मोऽविश्वगन्तरिक्षं स्वाहा देवानामुत्क्रमणमसि यज्ञः हे सोम यस्ते तव द्रप्सः विप्रुट् रसैकदेशः स्कंद
ति भूमौ वा अन्यत्र वा अवपतति यश्च तव अंशुः स्कंदति ग्रावच्युतः पतितः धिषणयोरुपस्था
त् उत्संगात् अध्वर्योर्वा यः स्कंदति परि वा यः पवित्रात् परिस्कंदति वा यः पवित्रात् यतः कुतश्चि
त्स्कंदतीत्यभिप्रायः तं तेऽहं जुहोमि तं विप्रुषं तेन तव संबंधिनं अंशुं चाहमग्नौ जुहोमि मनसा संकल्प्य व
षट्कृतं स्वाहा वषट्कारेणैवेत्यर्थः त्वं चात्वाले प्रास्यति देवानामुत्क्रमणमसि चात्वालमु
च्यते अतो हि देवाः स्वर्गं लोकमुदक्रामन् ग्रहान् दर्शयन्नवकाशान् वाचयन् यन्नस्येते प्राणा
यजमानस्य चात्व्यानस्य उपांशुप्राणान् रूपेण दर्शयति प्राणाय मे वर्चोदाः हे उपांशो यस्त्वं स्वभा
वत एव वर्चोदास्तं त्वा ब्रवीमि प्राणाय मे मदीयाय वर्चसे पवस्व वर्चः प्रयच्छ अनेन न्यायेन व्याख्या
तावकाशमंत्राः उपांशुसवनं व्यानाय मे अंतर्याममुदानाय मे ऐंद्रवायवं वाचे मे मैत्रावरुणं
क्रतुदक्षाभ्यां मे कामः क्रतुरुच्यते तस्य समृद्धिर्दक्षः आश्विनं श्रोत्राय मे शुक्रामंथिनौ युगपत्
चक्षुर्भ्यां मे वर्चोदसौ वर्चसे पवेथां शुक्रामंथिविषयं द्विवचनं आग्रयणं आत्मने मे उक्थ्यं ओ
जसे मे ओजो नेष्यामीत्याशंसा ध्रुवं आयुषे मे पूतभृदाधवनीयौ च युगपत् विश्वाभ्यो मे यो
युवां स्वभावत एव वर्चोदसौ तौ ब्रवीमि विश्वाभ्यः सर्वाभ्यो मे मम प्रजाभ्यो वर्चोदसौ वर्चसे
पवेथां प्रवृत्तिं कुरुतं अथ द्रोणकलशं कोऽसि वर्द्धमानाद्वासि क अनुष्टुप् अभ्यस्तं प्रजा

ऊ॰मं॰
त्र॰
६२

पतिरूपं द्रोणकलशमाह कोसि कः प्रजापतिः सत्वमसि कतमोसि अतिशयेन प्रजापतिरसि अ
नन्यभूतः प्रजापतिना कस्यासि कस्य प्रजापतेरनन्यभूतोसि कोनामासि प्रजापतिनामासि किंच
यस्यतेनवनामामन्महि मनत्तानेविजानीमः पंचत्वासोमेन अतीतृपाम तर्पितवंतः सोअस्मानवि
दितनाम्नः कुरु तर्प्यषच कामैरितिशेषः जपति भूर्भुवः स्वरिति व्याख्याते ऋतुग्रहास्त्रयोदश
गृह्णातित्रयोदशभिर्मंत्रैर्मंत्रास्तुनामैव उपयामगृहीतोसिमधवेत्वा उपयामगृहीतोसिमाध-
वायत्वावासंतिकौ ऋत्स्व ऋत्व षड्च्यते मधुप्रमाव मत्तेवसंते उत्पद्यंत इति इतिमधुमाध
वौमासौ ... चये ग्रैष्मौ मासौ उभावपिशोचनेः ... नभसे नभस्याय वार्षिकौमा
सौ ... भाति मेघप्रचुरत्वात् तस्मान्नभोनभस्यश्च इषे ऊर्जे शारदौमासौ इषं अन्नं ऊर्जं
उपसेचनंदध्यादि तदिह प्रचुरंभवति इतिमतुलोपात् भेदोपचारात् द्वामासावुच्यते सहसेस
हस्याय हेमंतिकौ मासौ सहतेः प्रसहनार्थस्य अभिभवति ... तपसे तपस्याय शैशि
रौ मासौ ... अंहसस्पतये त्रयोदशो मासः अंहः पापं तस्य पतिः अ
यंच ह्वादशस्वपितपति ऐंद्राग्नं ग्रहं गृह्णाति इन्द्राग्नीआगतं गायत्री ऐंद्राग्नी आगतं आगंछतं स
नमभियुतं सोमं प्रति गीर्भिर्नभोवरेण्यंगीर्भिः स्तुतिलक्षणाभिर्वाग्भिर्नभोवरेण्यं नभआदित्यो भ
वति तेनाभासां ज्योतिषां प्रणयः ... नभइव आदित्यमिव वरणीयसोम आगत्य अस्य

६२

सोमस्यपातंपिवतंधियेषिता यजमानस्यसंवंधिन्यावुध्याईषिताप्रेषितौसंतौ उपयामगृहीतोसींद्राग्नीभ्यां
त्वागृह्णामि एषतेयोनिः इंद्राग्नीभ्यांत्वाआसादयामि ॥ ग्रहस्यद्वितीयोमंत्रविकल्पः आघाये आग्नै
द्रीगायत्री आघायेअग्निमिंधते आइंधतेइंधीदृसोआदीपयंति येअग्निमिद्धिषःसोमचान्तमीसेयंज्वा
नः घइतिनिपातोनर्थकः येचस्तृणंतिवर्हिरानुषक् आनुषगितिनामानुपूर्वस्यानुषक्तंभवति
आनुपूर्वेणक्रमेणकिंतेषामितियेषामिंद्रोयुवा अनुपहतपराक्रमस्तरुणशरीरः सखा समानख्यानः तेन
तेषामयज्ञनाम् उपयामेत्यादिव्याख्यातं वैश्वदेवंगृह्णाति ओमासः वैश्वदेवीगायत्री हेओमासःस
विस्तारस्तर्पयितारस्तर्पणीयावाचर्षणीधृतः चर्षणयोमनुष्याणांतेनोपकारेणावनीयावातर्प
णंद्धीधारयितारश्चसंविन्निकर्त्तारस्तेश्चपेदा) तान्धारयंतितेर्वाधियंतइतिचर्षणीधृतः हेविश्वे
देवासः विश्वेदेवाइहागच्छताकथंभूताः दाश्वाश्वसः दाशृदानेदाश्वानितिनिपात्यतेदत्तवंतोयज
मानस्यकामानूपूरयंतइत्यर्थः किमर्थंसुतरसुतमागच्छत दाशुषः सुतंहवींषिदत्तवतोयजमान
स्याभिषुतंसोमंपातुउपयामइत्यादिव्याख्यातं द्वितीयोमंत्रविकल्पः विश्वेदेवासः वैश्वदेवीगाय
त्री हेविश्वेदेवाइहागच्छतागत्यचश्रुणुतममइमंहवमाकानंश्रुत्वाचावधार्यचआनिषीदत इ
दमस्मदीयंवर्हिः उपयामगृहीतोसीत्यादिव्याख्यातं मरुत्वतीयंगृह्णाति इंद्रमरुत्वःमरुद्भिः स
हितइंद्रोदेवता इतउत्तरंचनसृणमरुत्वाद्दृष्टभाइंद्रार्षमाकुमाहेंद्रात्रहेइंद्रमरुत्वमनुवसोरुः स

बुद्धोक्तं दसीति मरुत्वं हे मरुत्वत् मरुद्भिः सहित इहास्मदीये यज्ञे याहि पिव सोमं कथं पिवेत्तत्राह यथा
शार्याते अपिवः शार्यातो मानवः तस्यापत्यं शार्यातः शार्यातो ह वा इदं मानवो ग्रामेण चचारेति श्रुतिः यथा
येन प्रकारेण शार्याते राजनि अपिवः पीतवानसि सुतस्याभिषुतस्य सोमस्य त्वमंशुं किंच तव प्रणी
ति तव प्रणीत्या प्रणयनेन तव च सूरशर्मन् शर्मणि शरणे यज्ञगृहे आविवासंति विवासंति परिचर्य
या आभिमत्येनायस्थिताः त्वां परिचरंति कवयः क्रांतदर्शिनः सुयज्ञाः कल्याणयज्ञाः उपयाम इत्यादि
व्याख्यातं द्वितीयं मरुत्वतीयं गृह्णाति मरुत्वंतं मरुद्भिः सहितं इंद्रं वृषभं वर्षितारं वाजयाने वर्द्धमा
नं अकवारिं अकुत्सितारिं शत्रवोपि यस्य अकुत्सिताः वृत्रादयः अथवा अकुत्सितदाने अथवा अकु
त्सिते ऐश्वर्ये दिव्यं द्युलोकजं शासं प्रशासनवंतं शासितारं वा विश्वासाहं सहतिरभिभवार्थः
स्वपमिच्युतस्य सर्वस्याभिभवितारं उग्रं उद्गूर्णवज्रं सहोदां बलस्य दातारं यमिंद्रं भृतमिंद्रमाजः तं
अवसे नूतनाय नवनाय अचिरंतनाय इह यज्ञगृहे हुवेम आह्वयामः उपयाम इत्यादि व्याख्यातं
तृतीयं मरुत्वतीयं यजुषा ग्रहं गृह्णाति उपयामगृहीतोसि मरुतां त्वा ओजसे गृह्णामीति शेषः ओज
इति बलनाम स्वकीयमोजो निधाय इंद्रं प्रति मरुत आयाताः ततोनेन गृहीतेन सबलायाताः तदेत
यजुर्वदति द्वितीयो मंत्रविकल्पः सजोषा इंद्र हे इंद्र यः त्वं सजोषाः समानजोषणः समानपात्र
भोजी तं त्वा ब्रवीमि सगणो मरुद्भिः सोमं पिव समानगणो मरुद्भिः भूत्वा सोमं पिव वृत्रहा वृत्रस्य

हंताभविष्यामीतिशेषः हेशूरविक्रांतविद्वान्प्रतमर्थंसंजानान ततः त्वा सोमं मरुद्भिः सहजहिशत्रू
न्भिंधिशत्रून्हत्वाचमृधान् अपमृधोनुदस्व अपनुदस्वमृधः नुदप्रेरणे मृधः संग्रामान्हत्वाशत्रून्
येहतावशिष्टाः शत्रवः तान्संग्रामात्प्रेरयस्व अथाभयंकृणुहि विश्वतोनः अथानंतरमभयंकुरु
सर्वतोस्माकं उपयामगृहीतोसीत्यादिव्याख्यातं मरुत्वां इंद्र हेइंद्रयस्त्वंमरुत्वान् मरुद्गणयुक्तः वृषभः अभी
वर्षितापां अंतरिक्षेवस्थितः तंत्वाब्रवीमिरणायपिवसोमंरणेसंग्रामंकरिष्यामीतिपिबसोमं अनु
ष्वधं अनुपश्चात्स्वधामन्नंपुरोडाशधानामंथदधिपयस्यालक्षणंयस्यसततथोक्तः तं मदाय मदेहिस
न्तियोद्धाभवतींद्रः कथंपुनः पिब आसिंचस्वजठरेमध्वऊर्मिं अक्रूपणमासिंचस्व जठरेउदरेम
ध्वः मधुमयमित्यौपमिकंमाघ्येतेः मधुस्वादस्यसोमस्यऊर्मिं महांसंघातंविशिष्टस्यसोमपानस्य
मेवहत्कुहेत्वमाह त्वंराजासिप्रतिपत्सुतानां यतः त्वमेवराजाईश्वरोसिप्रतिपत्प्रभातिषुप्रतिदि
ष्टसुतानामभिषुतानांसोमानाम् किमुतचतद्दृश्यतेभिषुतानांत्वदर्थमेवसर्वास्वतिथिषुसोमाभि
षूयंतइत्यभिप्रायः छंदोगानामपिप्रतिपद्विद्यते तदभिप्रायेणैतत् उपयामगृहीतोसीत्यादिव्याख्यातम् महाँ इंद्रं
गृह्णाति महाँ२ इंद्रः त्रिष्टुम्माहेंद्री महान्प्रभावतइंद्रस्त्वापितृवन्नृमन्नृष्वदाहूयमानआगच्छति
आचर्षणिप्राः चर्षणयोमनुष्याः प्राप्रपूरणे आगत्यचर्षणीनांमनुष्याणांपूरयिताकामैः किंच उ
तद्विबर्हाः अपिद्वयोः स्थानयोः परिहृढोमध्यमेस्थानेउत्तमेचपरिहृढः परिहृढः प्रभुअग्निनः स

मं॰ऊ॰न
६४

64

होभिः अमितोऽमितमात्रः सहोभिः बलैः अप्राकोलिबलः यद्वा अनुपहिंसितः शत्रुबलैः अस्म
द्वीवाहृथे वीर्याय अस्मदर्शनोत्कः संवर्द्धने वीर्यायवीरकर्मणे यः इंद्रः सोऽस्मदीयैः कर्मभि
स्तूयमानः उरुप्रमाणतः पृथुस्त्वविस्तारेण सुकृतः शोभनकृताभिप्रायः भूतभूयात् उप
यामइत्यादिव्याख्यातं द्वितीयोमंत्रविकल्पः महान् इंद्रः गायत्रीमाहेंद्रीमहांतिद्रोयः सः ओ
जसा बलेन प्रभावसाधनेन पर्जन्योवृष्टिमानिवा यथा वृष्टिमान्पर्जन्यो धाराभिरपरिच्छिन्न
स्त्वपवमानः सा संख्यातः महाभाग्येनस्तोमैः स्तूयमानोवत्सस्य वसनशीलस्य यजमानस्य
वावृधे वर्द्धते उदुत्यंतिकः उत्पन्नंसूर्यंजातवेदसं जातप्रज्ञानंदेवंदातारं घुस्यान्तं) उपयामइत्या
दिसमानं दाक्षिणात्रिजुहोति उदुत्यं सौरीगायत्री उदित्ययमुपसर्गो वहतीत्यनेनसंबध्यते
उदुहंतिकः उत्पन्नंसूर्यंजातवेदसं जातप्रज्ञानंदेवंदातारं घुस्थानंवा केतवोरश्मयः किमर्थ
मर्थमुद्वहंति दृशे दर्शनाय विश्वाय षष्ठ्यर्थेचतुर्थी विश्वस्यजगतः द्वितीयंजुहोति चित्रंदेवता
सौरात्रिष्टुप् सूर्यश्चात्रपरापररूपेणावस्थितः स्तूयते चित्रंदेवानामुदगादनीकं उदयकाला
दारभ्यतावदपररूपेणस्तूयते चित्रमितिक्रियाविशेषणं यः चित्रमाश्चर्यभूतमुदगमत् आश्च
र्यहियः स्वकीयेनज्योतिषाशार्वरंतमोपहत्यान्येषांचज्योतिषां ज्योतिरादयोजह्वति यद्वाचायनी
यप्रजनीयउदगमत् देवानामनीकमित्यनयोपदयोः संबंधः देवानांरश्मीनामनीकंमुखं य

त्वचक्षुर्मित्रस्य चक्षुर्मित्रादिकस्य सदेवमनुष्यस्य जगतः आदित्योदये हि रूपाण्यभिव्यज्यन्ते यश्च
आप्रा द्यावापृथिवी अन्तरिक्षं यश्च उदयसमनन्तरमेव आप्राः आपूरितो ऽप्राः पूरितवान् स्वकीयेन प्र
काशेन द्यावापृथिव्यौ अन्तरिक्षं च अथ सन्नानि विशेषणानि मण्डलाभिप्रायाणि व्यसकलिंगान्यत्र
याद्यदानीय रूपेणेत्याति। स सूर्य आत्मा पुरुषाभिप्रायमेतत् जगतो जंगमस्य च तस्थुषश्च स्थाव
रस्य चेत्यर्थः तथा च श्रुतिः यमेतमादित्ये पुरुषं वेदयन्ते स इन्द्रः प्रजापतिः तद्ब्रह्म सूर्याद्वैत
मनेन मन्त्रेणानुध्यायते सः सूर्य आत्मत्वेनोपास्यः एवं तावदधियज्ञं गतो ऽप्ययं मन्त्रो ऽधिदैवमाध्या
त्मं तु वक्ष्यति यो ऽसावादित्ये पुरुष इत्यादिना ॥ आग्नीध्रे जुहोति अग्ने नयेत्यनया आग्नीध्रीयेऽग्नि
काम्यमित्रो च तस्यामेतया यजुरन्ताः स्वाहाकारेण आग्रयणशालायां तिष्ठन्नभिमन्त्रयते दक्षिणाः
स्थिताः दक्षिणाः रूपेण वो रूपमभ्यागां अग्रयेव शवस्यात्मनो दानमसहमाना अन्यानि रूपाणि
आददिरे तान्देवाः स्वैः रूपैः प्रत्युपातिष्ठन्त तत्तस्येव रूपेराजगम्। एतन्निदानमस्य मन्त्रस्य रू
पेण रूपेणास्माकं वः युष्मत्सम्बन्धि रूपमभ्यागां अभ्यागतः सर्वो हि स्वरूपमागच्छतीति भावः अभि
प्रायः किंच तुथो वो विश्ववेदा विभजतु तुथो ब्रह्मा प्रजापतिर्वः युष्मान् विश्ववेदाः सर्वज्ञो वि
भजतु यथार्हं स्वस्वाभिमतं विभागं करोतु इयं चेतज्ज्ञानानाऋतस्य यज्ञस्य प्रस्तुतस्य यथामार्गेण
प्रेत प्रगच्छत न च द्रदक्षिणाः चंद्रं स्ववर्णं यजमानस्य हस्तगतं हितीयं यथा सा नाग्रं इह हितीयदक्षि

णा इति आग्नेयं दक्षिणा इत्युक्ताः शाकपार्थिवादित्वादुत्तरपदलोपी समासः सदो गच्छन्ति विश्व:
पश्यन्त्वन्तरिक्षमिति दक्षिणोच्यते विपश्यन्त्वित्यादक्षिणया सोपानभूतया स्वः स्वर्गं देवयानमा
र्गं विपश्यन्ति च वि अन्तरिक्षं लोकं पितृयानमार्गं विपश्येतेत्यर्थः मधुमद्भृष्ट सप्त उत्तमो याख्यातः अ
स्य सदसि स्थितान्ब्राह्मणान्प्रेक्षते यतस्त्वं सदस्यः दक्षिणोच्यते यतोऽप्रयत्ने तथाभूतं प्रयत्नमा
तिष्ठ यथा सदस्यः ऋत्विग्भिरतिरिच्यते आग्नीध्रं गच्छति ब्राह्मणमद्य अस्मिन्दिने विदेय पितृमन्तं
अनुशिष्टेन पित्रा जातं नहि कश्चिद्विना पित्रा जायते पैतृमत्यं यस्य पितामहः प्रभृतयोऽपि विश्रुताः
अविद्याः स एवमुच्यते ऋषिमार्षेयं ऋषिर्मन्त्राणां व्याख्याता आर्षेयो जातस्तथा वरैश्च जातः सुधातु
दक्षिणं शोभनं धातुः सुवर्णं तद्दक्षिणा यस्य स सुधातुदक्षिणः सुवर्णं आग्नीध्रे दीयते दक्षिणां द
दाति । अस्मद्राता राद्दाने हेदक्षिणाः अस्माभिर्दत्ताः दत्ताः सत्यो देवत्रा गच्छत देवान्प्रतिगच्छत ततो
नेत्तरं यज्ञफलं साधयत प्रदातारमाविशत प्रकर्षेण दातारं आविशत प्रकर्षेण दातारं यजमा
नं इत उत्तरं पञ्च प्रतिग्रहणमन्त्राः हिरण्यं प्रतिगृह्णाति अग्नये त्वा मह्यं वरुणो ददातु अग्निरपा
पत्त्राय मह्यं हिरण्यं त्वा वरुणो ददातु वरुणो न हि हिरण्यमग्नये दत्तं पूर्वं मतस्तेनैवात्मना गृह्णा
नो न भविष्यामीति देवतादेशः सोऽमृतत्वमशीय सोऽहमनेन विधानेन गृह्णानो अमृतत्वं व्याप्नुया
आयुर्दात्रे एधि आयुष्मान्दाता भवतु मयो मह्यं प्रतिगृहीत्रे मयः सुखं एधि भव मह्यं प्रतिग्र

हीत्रे गां प्रतिगृह्णाति रुद्रायत्वारुद्रदैवतायमह्यंदेहिगोः त्वांवरुणोददात् सोहमनेनविधानेनगृह्णानो
ऽमृतत्वमश्यां प्राणोदात्रेएधि प्राणन्तूपंभदात्रेभव वयोमह्यंप्रतिग्रहीत्रेऽवयोत्रपश्चर्वीभ
वमह्यंप्रतिगृहीत्रे वासोगृह्णाति बृहस्पतयेत्वा बृहस्पतिदैवतायमह्यंत्वांवरुणोददात्
सोहमनेनविधानेनगृह्णानोऽमृतत्वमश्यां त्वक्दात्रेऽएधिभव मयः सुखंभवमह्यंप्रति
गृहीत्रेअश्वंप्रतिगृह्णाति यमायत्वायमदैवतायमह्यंत्वांवरुणोददात् सोहंयमदैवताय
नः सत्प्रतिगृह्णानोऽमृतत्वमश्यां हयोग्रसः दात्रेभव वयोन्नपश्चर्वीभवमह्यंप्रतिग्र
हीत्रे अथयदन्यद्ददाति तदनेनप्रतिगृह्णाति कोदात् कः पुरुषः अदात् एकः प्रश्नः कस्मै
पुरुषायअदात् दत्तवान्द्वितीयः प्रश्नः कामोदात् कामायादात् द्वौप्रतिप्रश्नौयथासंख्ये
एवंचेत्कामएवदाताकामः प्रतीगृहीताच अतोब्रवीमि हेकामएतद्वस्तुतेतवत्वमेवके
नचित्प्रयोजनेनददासित्वमेवकेनचित्प्रयोजनेनप्रतिगृह्णासीति ॥ उव्वटकृतेमंत्रभाष्ये
सप्तमोध्यायः ७ ॥ आनंदपुरवास्तव्यवज्रटात्मजस्तुनाना मंत्रभाष्यमिदंकृतंपदवाक्यैः सु
निश्चितैः आदित्यग्रहंसमस्तंवोत्सर्ग्यप्रतिप्रस्थातादित्यपात्रेणद्रोणकलशात् उपयामगृहीतोसी
तिगृहीत्वादित्यदेवत्यानन्जुहोति सर्वेतेमंत्राः उपयामगृहीतोस्यादित्येभ्यः त्वागृह्णामी
तिशेषः आदित्यस्थालीपात्रेणापिदधाति विष्णोउरुगायएष विष्णो उरुगमनाय एषते

मे॰त्र
भा॰
६६

66

तवसोमः समर्पितः तंगोपायगोपायन सहतंचत्वांमादभ्रुध्रुः रक्षांसि दभ्नोतिर्हिंसाकर्मा
आदित्यग्रहंगृह्णाति कदाचनस्ताखोतोयंमंत्रोयस्मादैंद्रद्वयोरस्यविशेषः इहत्वादित्य
देवतायजुरन्यआदित्येभ्यस्त्वेतियजुः द्वितीयंगृह्णाति कदाचनहृहतीआदित्यदेवता
यजुरन्यत् आदित्येभ्यस्त्वेतियजुः कदाशब्दः कालवचनः नचेतिनिपातः पुनरर्थेपु
क्तेतिः प्रमादार्थः हेभगवन्नादित्यकस्मिंश्चित्कालेपुनः प्रमाद्यसि उदयनापपाकस्यका
शारीनस्थनुयंशाश्माणिपुर्द्ववंनकदाचिदित्यभिप्रायः एवंकाकुगतेनविशेषणेन
व्याख्येयं अथवाकदाचनेतिवलिकौलीमेतन्यदहृयंव्याख्येयं यत्रकदाचिदपीमने
नाथ्यवतंचकारगर्भंसविनुनिधाने अस्याभामंचकारेनागर्भनिधानीमितियथाया
स्केनदर्शितं नकादाचित्प्रमाद्यसिस्वकीयंकर्मप्रभेचनितनरांयाासिदेवमनुष्यसवर्षि ऽगोपायसि
नीजनानीनरीयेत्यविभक्तिकोनिर्देशः तुरीयंचआदित्यसवनं नवरुद्रियंचवीर्येनवे
वस्त्रानस्या आस्थितंअमरतममनष्ठरंविज्ञानानंदस्यभावादिविपुलोकेआदित्यमण्डलं
लानस्यतत्त्कं पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवीति एवंपरापररूपेणास्मा
स्वादित्यः स्तुतः आदित्येभ्यस्त्वागृह्णामीतिशेषः दृश्यप्रीणातियज्ञोदेवानांमिष्ट
यजुरंतादित्यदेवस्याआदित्येभ्यस्त्वेतियजुः यस्मादयज्ञोदेवतानामादिमानोस्त्वत्सव

कं जुषतेति तस्माद्धेतोः हे आदित्यासः आदित्या एव आदित्यासः आज्जसेरसुक् भवतामस्मद्यज्ञस्य
उरुक्षवेन त्वचोः स्थैरात्मन्यो छांदसः मृडयितारः सुखयितारो भवतास्माकं किंच आवो वी
वीस्तु मनोर्वहत्यात् आहुत भवत वः युष्मत्संबंधिनी सुमतिः अर्वाचीच अस्मदभि मुखी चास्तु
हे मित्रावरिवो वित्तरासत् अंहः पापकारी विच्छेदोपि अंहः हो पि पापकारिणो पि यास्तु मतिः
वरिवो वित्तरा वरिव इति धननाम अतिशयेन धनस्य लब्ध्री असत् भवतु सास्तु मतिः अस्मदभि
मुखी अवहत्यादिति संबंधः उपोषु सवने न ग्रहे मित्र यति विवस्वानादित्य नमासिविवासय
नीति विवस्वानादित्य उच्यते हे विवस्वन्नादित्य एषते सोमपीथः एतत्तव सोमपानं तस्मिन्न
स्त्वमदस्मै रक्षिं कुरु तत् हिंकरुत्तिय मा सिंचन सोमं अवेदयति पत्नी अदस्मै नरः जगती
आशीर्यजमानपत्नी विषया अदिति सप्तनाम सुपठितं अहृयानं अहृयानानं कुरुत नेम
नर्थकाउपसर्जनाभवन्नीति न कारोनर्थकः अस्नाऊहत असेव वचसे हे नरः ऋत्विक् यजमा
नाः यत्किमिमतमाह आशीर्हा आशिषो दातारः दंपती पत्नी यजमानो वामवतत्तेनीयं अ
श्रुतो वामृतो यत्नफलं किंच इस्वेव श्रमा मृतो जायते इति हितापि अश शब्देनोच्यते इत्यतः श्रमा
निति विशेष्यते किंच विंदते वसु लभते धनं अर्थो मधम अथो स्मेतो छंदसि समानार्थो अस्थाने

नरंविश्वाहा सर्वदाअरयः रयोरितिश्रमितिपापनामनीभवतः अपापः सन्‌पथते पथहृथोवर्द्धतेगृ
हएवावस्थितः ॥ सावित्रंगृह्णाति वाममद्यसावित्रीत्रिष्टुप्‌हेसवितः वामयत्तनीयं अद्यअस्मि
न्दिवसेसाविरितिमंवधः वाममुश्वः वामंचउपाशंसनीयंकालेसावीः श्वउपाशंसनीयः काल
इतिहिपास्कआह किंच वक्तनोऽन्नेनदिवेदिवेवाममस्मभ्यंसावीः अहस्यहनिवामंअस्माकं
प्रसूयाः किंच वामस्यहिक्षयस्यदेवभूरेः नयसोहोतिवासवचनस्याग्रुदात्तत्वात्‌ नयोनि
वामइतिहिपाणिनिराशुनत्वंस्मरति वामस्यचनिवासस्यदेवदानादिगुणयुक्तभूरेः व
हूनोयतप्रसस्यदातामभवेतिशेषः अयायियायीरितिकर्मनामअनेनसोमाख्येनकर्म
णावामभाजः अभिलषितभाजिनोवयंसंभवेम उपयामगृहीतोसि सावित्रोसिसवित
देवत्वोसि चनोधाअसिचनोधाअसि चनइत्यन्ननाम अभ्यासेभूयांसमर्थंमन्यते अतिशयेनचा
न्नस्यधारयितासि अतः चनोऽन्नंमयिधेहि स्थापयकिंच जिन्वयज्ञंजिन्वतिः प्रीतिकर्मात
र्पययज्ञं तर्पयचयज्ञपतिंयजमानंमगाययज्ञफलाय देवायसवित्रेत्वागृह्णामीतिशेषः ॥
वैश्वदेवंगृह्णाति उपयामगृहीतोसीतिव्याख्यातं सुशर्मासि स्वाङ्क्रयासि सुप्रतिष्ठानः शो
भनाप्रतिष्ठाअस्येतिसुप्रतिष्ठानामहत्साधनसंपन्नः शर्मणावैसुशर्मासुप्रतिष्ठानइतिश्रुतेः

प्राणहेतुत्वात्प्राण इत्युच्यते अग्नं हि ग्रहोत्वं च प्राणहेतुः यस्मात्त्वं सुशर्मासि सुप्रतिष्ठानस्तस्मा
द्बृहदुक्षाय महो सेवनाय जगदुत्पत्तिबीजाय प्रजापतये नमो भवितुमर्हसीति शेषः नम इत्य
न्ननामसु पठितं प्रजापतिर्वै बृहदुक्ष इति श्रुतिः विश्वेभ्यस्त्वा देवेभ्य इति व्याख्यातं पात्नीवतं
गृह्णाति उपयामगृहीतोसि इति व्याख्यातं बृहस्पतिसुतस्य ब्राह्मणेभ्य उक्तात्तस्य हे देव सोम
नेतवदिन्दो इन्द्रियावतः वीर्यवतः पत्नीवतः पत्नीसंयुक्तस्य सतो ग्रहानन्यानुपोष्य प्रसतीन् ॥
ऋध्यासं समर्द्धयेयं प्रचरणीसंस्रवशेषेण आग्नीध्रीणाति अहं परस्तात् त्रिष्टुप् प्रजापतिरूपेणात्मा
न पश्यन्नाग्नीध्रीणाति अहं परस्तादस्य जगतः अहं चावस्तात् यदन्तरिक्षं तदु मे तत् देव मे पिता माता
भूतं भूतं च अहं च सूर्यमुभयतो ददर्श पुरस्तादवस्ताच्च पश्यामि सूर्यस्य परस्तात् मम शिर इ
त्यभिप्रायः यच्च देवानां परमं गुहा तदप्यहमेव ॥ जुहोति अग्नाइ पत्नीवन् पत्नोपगृह्यस्यहूरा
हूतः पूर्वस्यार्धस्योदुम्बरस्येनाविति [illegible] इति निरुक्तेः हे अग्ने पत्नीसंयुक्त सजूर्देवेन त्वष्ट्रा
समानप्रीतिः देवेन त्वष्ट्रा सोमं पिब स्वाहा पत्नी उद्गातारमवेक्षते प्रजापतिः यः स प्रजापतिः वृ
षा च रेतसः सेक्ता रपितासि स्वभावतः एवं तत्त्वां ब्रवीमि रेतो मयि धेहि स्यामपत्यप्रजापतेस्तव
हृतः सेक्तः रेतोधसः रेतसो धारयितुः स्वभूतं रेतो धारेतसो धारयितारं त्वष्टुस्त्वत्प्रसादे
यसामन्त्रेण हारियोजनं गृह्णाति उपयामगृहीतोसि हरिरसि हरितवर्णोसि हरिः सोमो हरि

नवर्णइति हारियोजनः इंद्राग्नोहरियायत्रप्रजेमे इतिहारियोजनः हरियोजनएवहरियोजनः
स्वार्थेनद्धितः ऋकामेवेहरीइतिश्रुतिपदः हरिभ्यांत्वागृह्णामीतिशेषः धानाश्रावपतिहर्यो
र्हीनास्य: हरितवर्णायोर्धानाभवथ यूयंसोमेनचसहितांइंद्रायभवथ श्रामभवतः यस्तेश्वसनिः
यस्तवश्वस्थानसनोतिसंभजनेभक्तः यश्चगाः सनोति संभजनोभक्तः तस्यतवसंवेधिनः इष्टयजुषः
इष्टानिहियजूंषिभवंति स्तुतस्तोमस्यश्रस्मिन्नवसरेस्कृताः स्तोमाभवंतिशस्तोक्थस्य शस्तानिभ
वंति उपहूतस्यश्रभ्यनुज्ञातस्यउपहूतोभ्यनुज्ञातोभक्षयामि॥ शाकलाधानं देवकृतस्य देव
विषयकृतस्यएनसः पापस्य श्रवयजनं श्रवहर्वांवाजिनशिनेवर्तते नाशनेभवति पितृविष
येकृतस्यपापस्यनाशनंभवति मनुष्यविषमेकृतस्यपापस्यश्रात्मनिंदादेःनाशासनमसि एन
स २ यावन्तिपापानितेषांसर्वेषांनाशनमसि यच्चान्यदप्यहंपापंविदन्चकारकृतावान् यच्चावि
द्वान् श्रज्ञानानस्तस्यसर्वस्यनाशनमसि॥ चमसानभिमृशंति संवर्च्चसेतिव्याख्यातं समिष्टय
जूंषिजुहोति समिद्रणाइत्याद्याषट्त्रिष्टुभः तत्रत्रिभिर्यजमानमाप्याययतित्रिभिर्देवताविसृज
ति॰समिद्रणः ऐंद्री समित्ययमुपसर्गः तेषीत्यनेनक्रियापदेनसंबध्यते हेभगवन्निंद्रासंनेषिम
नमय नः श्रस्मान् मनसासंगममसिच गोभिर्वाविभिर्गवादिभिकृपशुभिः संगमयसिच सूरि
भिः पण्डितैः हेमंघवन्संगमयसिच स्वस्याश्रविनाशेनस्वस्तीतिविनाशामामसंगमयसिब्रह्मणा

देकृतं देवैर्दैवत्रयीलक्षणं तदेवस्पष्टयति यदस्तियन्निमित्तमर्थः संगमयसि च देवानां समतौ
तृतीयाविपत्तिर्णाम शोभनयामत्या यज्ञियाना यज्ञसंपादिना यत्नमस्मानेव सर्वैर्मनः प्रभृतिभिः
संगमयसि तस्मै तवैतद्धविः स्वाकृतमस्त्विति शेषः सर्वज्ञमापयसा वाग्याम्यां तथा तारातिः षड्देव
ता अस्माद्विधानासविताप्रजापतिः अग्निः त्वष्टाविष्णुपतेषड्दि विनिधिर्या देवाः इदं समिष्टय
जुर्लक्षणं रातिर्हविर्दाने जुषन्त सेवन्तां जुषित्वा च प्रजया संरराणाः यजमानं संवर्धयित्वा प्रजया संरम
माणाः यजमानाय एतद्द्रविणं धनं दधातेति प्रथमपुरुषस्य स्थाने मध्यमपुरुषश्छान्दसः दध
तु स्थापयत एवं तावदस्य मन्त्रस्य सम्यग्योजना प्रतिभाति हे सुगाः देवाः सुगमनीयानि वो
युष्माकं सदनानि स्थानानि अकर्म कृतवन्तो वयं ये इममाजग्म आजग्मुरागताः सवनमिदं
जुषाणाः यज्ञमिमं मवेमानाः अथेदानीं परिसमाप्ते यज्ञे भरमाणा वहमाना हवींषि येन रथि
मस्ते रथे सुभरमाणा हवींषि येन अरथिनस्ते स्कन्धावसक्तानि हवींषि बिभ्रमाणाः हे देव देवात
तान्स्वरय अनुप्रस्थापादिभिः स्वस्वकीये सधस्थे सह स्थाने गृहे किमन्यत्प्रेरयति चेदत आह ये
ये मा त्रिवांसः पप्रस्तोरंग शं च पपिवांसश्च सोमं विश्वे सर्वे ते इदानीं परिसमाप्ते यज्ञे अस्मे वसूनि
स्वराति हतानु अनुलक्षणे इति कर्मप्रवचनीयसंज्ञा अस्त्वप्राणं वातमन्वातिष्ठत घर्मं चा
दित्यमन्वातिष्ठत स्वर्लोकमन्वातिष्ठत यस्य यत्र गृहा इत्यभिप्रायः वयं हि त्वा अग्निं वसज

वहमानानस्मत्प्रयन्तं वसवाव स्तु निन्दतास्मासु धनं हे सर्वे देवाः सवितारः वसूतिधा नातिमां वाह [illegible]
अतो हे नमवन्तो वर्यस्तत्त्वा वहन्तस्त [illegible] तवान सि उशतः कामयमानान् हे देव देवा तत्ताप्रेरयन्ता [illegible]

प्रज्या हि [illegible]

मं·भा·
६४
69

ति यं यं त्वा प्रयति प्रगच्छति प्रारभ्यमाणो यज्ञे यस्मिन्देवे अग्रे होतारं अद्य वृणीमहि कृतवन्तः इह मंत्रैरग्
निर्देवो देवेभ्यो होतेति त्वं च हूतः सन् ऋधगयाः ऋध्नोतेः एवं पदं यजतेः कृतं ऋधक् ऋध्यं यथा तथा
त्तीः समर्द्धयन्निष्टवानसि किंच ऋधग्युताशमिष्ठाः उत अपि च ऋध्नुवन्नेव यज्ञं प्रायश्चित्तं श
मितवानसि इदानीं प्रजानन्यज्ञपरिसमाप्तिं गृहन्नुपयाहि विद्वान् जानानः स्वमधिकारं दे
वा गातुविद इति व्याख्यातं यज्ञं अवसृजति यज्ञ यज्ञं गच्छ हे यज्ञ यज्ञमेव त्वं गच्छ नहि त्वत्तोः
न्यदसि सर्वात्मना हि त्वमित्यभिप्रायः यज्ञपतिं यजमानं गच्छ ॥ स्वां च योनिं गच्छ इदमेव नो
हि यज्ञस्य स्वा योनिः एष ते यज्ञः अयं तव शरीरभूतो यज्ञः संस्कृतः ऋत्विग्भिः हे यज्ञपते सहसू
क्तवाकः सांगः सर्ववीरः सर्वैर्वीरैः रूपेतः सोमः पशुः सवनीयाश्च पुरोडाशा वीरा उच्यन्ते तं च
जुषस्व सेवस्व कृष्णविषाणमेखले चात्वाले प्रास्यति मा हिर्भूर्व्याख्यातं वाचयति उरुं॰ द्विवारु
णी त्रिष्टुप् एकं तावत् उरुं विस्तीर्णं हि प्रतिशायेन राजा वरुणः सोऽवभृथाय चकार कृतवान्
सूर्याय बहुशश्चैव तत्र्थी सूर्यस्य पंथां पंथानं अन्वेतवा उ अन्वेतुमागमनाय अपरं अपदे पा
दा प्रतिधातवे कः यत्र पदं दत्तं प्रतिमुद्रान्यायेन नोपलभ्यते तस्मिन्नपदे पथि अंतरिक्षे लोकि
पादा पादानां षष्ठी बहुवचनस्थाने आकारः प्रतिधातवे प्रतिनिधानाय अकः कृतवानाल
वनमिति शेषः सूर्यस्यैव उत अपवक्ता हृदयाविधश्चित् उत अपि च अपवक्ता अपवदिता

६४

आहेत्याह. दयाविपश्चित् विद्वान्ः यर्थेहृदयं यो विध्यति मर्माणि छुच्चार्यो ब्रह्मार्ण्णापि सन्ः तस्याप्यर्थ
वदिता किमुतान्येषामयुक्तकारिणामिति यक्ष्मत्यभूतो वरुणः सोमभृत्यायनीर्थं ददातिति शेषः अ
पोचक्रमर्ध्वमन्वाचयति नमो वरुणायेत नमोस्तु वरुणाय अभिष्ठितः आक्रान्तः वरुणस्य पाशेनातः
स्तवेथनाय समिधंआस्याभिजुहोति अग्नेर नीकं आग्नेयी त्रिष्टुप् अग्नेरनीकमिति परोक्ष
लिंग दमेदमे समिधं यक्ष्याग्ने प्रत्यक्षं लिंगमेवास्मिन्वाक्ये अतएवं व्याख्यायते यस्मात्वामग्नेः
सतः अनीकं मुखं अपउदकं आविवेश प्रविष्टं अपान्नपात्सज्ञकं प्रतिरक्षन् असुर्यं असुरस
त्वमायादिकं सत्वमिदानीं दमेदमे दम इति गृहनाम यज्ञगृहे २ अश्वमेथविषयावीप्सा नहि
नानावमस्थाग्न्यहातिभवन्ति समिधं यक्षि यजतिः संगतिकरणार्थः समिधं संगतां कुरु आ
त्मसात्कुरु तेनानेन तरंहुतं प्रतितेनवजिकान्वालामुच्चरन्मोत् उच्चरन्तुसमिधः सकाशात् ॥
अजीषकुंभंसस्ता वपति समुद्रेते सौमी विराट् नमो वाके विधेम यदित्ययं निपातो हृदय शब्दे
नसहसंबध्यते समानलिंगत्वात् हृदे सोम यत् हृदयं समुद्रे समुद्रनेतेन वचना प्रत्युक्तः अवो
स्वयन्तर्वर्त्तते तत्रत्वागमयामि तत्रस्यं चत्वां संविशन्तु ओषधीः उत अपिच आपः किंच यत्र
स्थ चस्वक्कोकोशोभनवचनोच्चारणे नमोवाकेन नमस्कारवचनेच विधेम विधिमिति स्थापना
र्थः हे यज्ञपते सोम विसृज्यापतिष्ठते देवी रापः पत्निर्वा हरतीवा अपो च सोमस्य च संगतिव

इति हे देव्य आपः एष सोमो वः युष्माकं गर्भो वर्त्तते तं सुप्रीतं साधु तर्प्पितं सुभृतं सुष्ठु इष्टं विभृतय
पपत हे देव सोम एष ते लोकः स्थानं तस्मिन्नवस्थितः शं च वक्ष्व शं सुखं मम स्मान्यतिवह प्रापय
परिवक्ष्व अस्मत्तः सर्वा आर्त्तीः तस्मिन्नः शं वैधि सर्वाभ्य अनु आर्त्तिभ्यो गोपायेति श्रुतिः मन्त्र
यति अवभृथव्याख्यातं समिधमादधाति हे देवानां देवीभूतानां अस्माकं समिंधनं त्वं भवसि ॥ इत
उत्तरमनुवध्याया यदि गर्भिणी स्यात् तत्र प्रायश्चित्तिरुच्यते आतिष्ठते तस्मात् प्राकृतिरुक्ष्यमाणं
गर्भमभिमंत्रयते अवसानामहापंक्तिः एजतु दशमास्यः एजतु चलतु एजत्कं एवं दशमासस्का
लावच्छिन्न एव गर्भो जरायुणा सह जरायुर्गर्भवेष्टनं कथं चलतु इत्यत्र उपमया दर्शयति यथा
यं वायुरेजति यथा च समुद्र उच्छलति पतो हिमवदाचलतो एवमयं दशमास्यः तदेतद् दशमा
स्यं सं तत्र बलेनैव यजुषा दशमास्यं करोतीति श्रुतिः अस्य तस्य सतिरतेरूपं स्रवणेन वा स्रवसतस्त्रव
त्ववाजरायुणा सह गर्भवेष्टनेन सह अवदानान्यनुजुहोति यस्यै ते यज्ञियः अनुष्टुप् वशो च्य
ते यस्यास्ते न वयज्ञियो गर्भः यज्ञार्हो गर्भः यस्याश्चत वयोनिर्हिरण्ययी हिरण्मयी क्रियते व
ल्लेणाय जुषा तां त्वा गर्भेण सगमयामि यस्य च गर्भस्य अंगानि अकृता अकृतानि अनवखण्डिता
नि जक्करैः छेदसीतिरादेशः तं गर्भं मात्रा अनुवंध्यालक्षणया सं अजिगमं संगमयामि अध
यो रतु होममेवं जुहोति गर्भस्रूयते इंदुं सं स्रवणेन पुरदस्मा महिमानं महाभागं पश्वानेज अ

जनेर्वृष्टिकरणार्थस्यैतद्रूपं व्यक्तीकरोतिधीरः मेधावी इत्थंभूतं महिमानमात्मानं जयीरोयेनैक
पदींद्विपदींचतुष्पदीमष्टापदीमपिचसामगणयित्वाद्भुतत्रूपेण भुवनानिभूतजातानि आनुप्र
वेनांसमागमयंत यथानेवृद्धिरेवंभूतानांभविष्यतीत्यभिप्रायंकण्वप्रियेवसाचत्वष्पदीसती
एकपद्यादिभिर्भेदैरुच्यते अवक्तव्यभूयतइतिक्रमः वसयापकपदी वपयाऽग्रेगेस्त्राद्विपदीउपप
दहोमेस्त्रत्रिपदीचतुष्पदीपत्नीसंयाजेस्त्रत्तभिर्वापादेरष्टापदीत्तगर्भसंवेयिभिः यादेःजुहो
ति मरुतोयस्य मारुतीगायत्रीहेमरुतः यस्यहतेनिवासे गृहेह्वयोनिवास इत्याद्युदात्तः
पाथवापातेक्षापोरुक्क पिवथ पानादीन्कुरुथ हेदेवोविमहसः द्युलोकस्यविमहइतारः
पूजयितारः सस्तुगोपातमोजनः सस्तुसुप्रतमोयजमानजनः युष्मत्प्राणानांनभयमस्तीत्य
भिप्रायः अगारैरभिसमूहयति मही द्यौः द्यावापृथिव्यौगायत्रीमहतीद्यौः पृथिवीचनः
अस्माकं इमंयज्ञमिमिक्षतां मिहसेवने सिंचतं सेसैर्भोगैः पिपृतानः प्रीणयितांचनः अ
स्मा~~कंइमंयज्ञमिमिक्षतां~~न्भरीमभिः भरणैः हिरण्यपशुधान्यादिभिः॥ समाप्तोग्निष्टोमः
अथषोडशी अग्रेपवस्वेत्यततस्मात्ताक आतिष्ठतिस्त्वरोहो ऽनुष्टुभः आतिष्ठस्वइतिष्ठअ
रोह हेहत्रहन् वृत्रस्यहंतः रथंयुक्ताअश्वौतेनवक्रलक्षणत्रयीलक्षणेनइंद्रागच्छेत्यादिना
हरीहरितवर्णावश्वौमेहियाकानांनीदपक्षत्यपावावयोर्नियोजनकालइतिमत्स्य

कृ॰ मं॰भा
७१

मानोस्वयमेवात्मानंरथेनियुंनाति अतएवमाह युक्तावेब्रह्मणोहरीइति अथेदानींरथारूढस्यार्
वीचीनमस्मदभिमुखंसत्सायुतंतेयमनः हेइंद्र ग्रावासोमाभिषवकारीकृणोतुकरोतुवग्नुना
वग्नुरितिवाङ्नामसुपठितंसोमाभिषवध्वनिनाउपयामगृहीतोसींद्रायत्वाषोडशिनेगृह्णामि
एषतेयोनिरिंद्रायत्वाषोडशिने अथद्वितीयोग्रहणमंत्रः युक्ष्वाहिकेशिन र योगोयुङ्. त्वकेशिनो
बहुलंवकेशौहरीहरितवर्णावश्वौ वृषणौवर्षितारौसेक्तारौतरुणौकक्ष्याप्रा अश्वस्यमन्ता
हरज्जुः प्रापूरणेः कक्ष्याप्रपूरयतस्तौएवमुच्यते तौयुक्तौरथेतमास्थायअथानंतरमेवनःअ
स्माकंहेइंद्रसोमपमनपीलगिरामुपश्रुतिंचरास्तुतिलक्षणागिरवाचमुपश्रुत्यचरागच्छास्म
न्गृहं मुपयामगृहीतोसीत्यादिसमानंतृतीयोमंत्रविकल्पः इंद्रमिद्धरीइत्यनुष्टुप्एवार्थे इंद्रमेवहरि
तवर्णावश्वौवहतःप्रापयतः अत्रवाक्सामैवेहरीइतिश्रुतेर्द्विर्वचनान्तहरिशब्दस्यऋक्साम
वाचकत्वात् हरितवर्णावश्वाविंद्रमेववहतइतिव्याख्यानंनघटते हरितवर्णयोरश्वयोःस
र्वत्रसुलभत्वात्इंद्राश्वयोर्हरितवर्णत्वमप्रसिद्धमयूररोमभिः पृषतीअभूतामित्यादिश्रुति
दर्शनात्पशवोवैदेवानांछंदांसीत्यादिश्रुति पर्यालोचनयानानावर्णत्वंछंदोमयत्वंऋक्सामे
एवेंद्रंवहतइतियुक्तंननुहरितवर्णावश्वौ कथंभूतमिंद्रंअप्रतिधृष्टशवसन्नप्रतिधर्षि
यितंशक्यंतेयावोबलंयस्य सअप्रतिधृष्टशवाःतंअप्रतिधृष्टशवसं कवहतइत्यतआह

७१

ऋषिणांवशिष्ठप्रभृतीनांस्तुतीः उपसमीपेयत्तंचमानुषाणांयजमानानां उपसमीपेवहत
इतिवर्त्तते उपयामइत्यादिव्याख्यानंसमानं॥ षोडशीग्रहमुपतिष्ठते यस्मान्नजातः त्रिष्टु
प्षोडशीपरब्रह्मस्वरूपेणस्तूयते यस्मादन्यःपरउत्कृष्टोजातोदेवोनास्तिनविद्यतेयःइं
न्द्रायस्यआविवेशआविशतिभुवनानिभूतजातानि विश्वाविश्वानिसर्वाणि अन्तर्यामिरू
पेणतथाचश्रुतिः यःसर्वेषुभूतेषुतिष्ठन्निति यश्चप्रजापतिर्भवति प्रजयासंरराणः
संरममाणःत्रीणिज्योतींषिअग्निवायुसूर्यलक्षणानिसचतेसेवतेपरमात्मस्व
रूपेणसोयंषोडशीग्रहः ऋषेर्दृष्टार्थसम्प्रीतिर्भवत्याव्याख्यानसंयुक्ता षोडशिनंचभक्षयति
इंद्रश्चसम्राट् त्रिष्टुप्यजुरन्तासहस्राणेनेतियजुः इंद्रावरुणौदेवताषोडशिनःग्रहोवा
इंद्रश्चसम्राट् योवाजपेययाजी वरुणश्चकारश्चकारोसमुच्चयार्थो योराजायःराजसूय
याजी राजावैराजसूयेनेष्ट्वाभवतिसम्राड्वाजपेयेनेतिश्रुतिः तौइंद्रावरुणौतेतवषोड
शीग्रहस्यभक्षंचक्रतुः कृतवन्तौअग्रेप्रथममेतमिमंसभक्षेणसहसंबन्धः तयोर्भक्षमनु
कुर्वन्नहंभक्षयामिमदीयेमचभक्षेण वाग्देवीजुषाणासेवमानासोमस्यतृप्यतुसह
प्राणेन प्रप्याततयालालानुरोहवालितोमायज्ञः अग्नीन्द्रसूर्यदेवत्याः अग्नेपवस्वहेभगव
नग्नेपवस्वपवतिः प्रवर्त्तयेतिर्माविनतपर्थः पवस्वप्रवर्त्तयस्वयंत्वंस्वपाःसुकर्मा॥

म॰भा

अपहतिकर्म्मनामसुपठितं अग्नेः अस्मासु वर्च्चः ॥ ब्रह्मवर्च्चसं सुवीर्यं शोभनं वीर्यं दधद्धारयिम
यि पोषं दधत् धारयन् स्थापयन् रयिं धनं मयि पोषं पुष्टिं च प्रजां यच्छेति संबंधः उपयामगृही
तोसि अग्नये त्वा वर्च्चसे ग्राह्य त्वामिति भवेन्मंत्रः अग्ने वर्च्चस्विन्ने हे अग्ने वर्चस्विन् ब्रह्मवर्च्चससंयु
क्त यथा त्वं देवेष्वसि वर्च्चस्व्युक्तः एवमहं मनुष्येषु भूयासं भवेयं भूतमित्यस्मिन्मंत्रे वर्च्चःश
ब्दो ब्रह्मवर्च्चसपर्यायो दर्शितः श्रुत्या तथैव ब्राह्मणेनेष्टव्यं यद्ब्रह्मवर्च्चसी स्यादिति अतोस्मिन्म
न्त्रे वर्च्चः शब्दो ब्रह्मवर्च्चसपर्यायो वर्णितः उत्तिष्ठन्नोजसा मानकृत्स्नेगाउत्तिष्ठन् ओजसा
बलेन सह पीत्वा शिप्रे अवेपयः शिप्रे हनू नासिके वा हवेष्टकेपने अनिपानोद्धयानत्वा
सिके कंपितवानसि किं तद्धंधयत्पीत्वा अवेपयः इत्यत आह सोमं हे भगवन्निंद्र चमूसुतं अ
भिषवणं चर्म्म च मृशाहेनोच्यते अभिषवणचर्म्मणि अभिषुतं सोमं पीत्वा अवेपय इति संबंधः
उपयामगृहीतोसि इंद्राय त्वौजस एष ते योनिः इंद्राय त्वौजसे प्रगुणं ग्रहं भरयामि हे इंद्र
ओजिष्ठ अतिशयेन ओजस्वी युक्तो यथा ओजिष्ठः त्वं देवेष्वसि एवमोजिष्ठोहं मनुष्येषु भू
यासं अदृश्रमस्य केतवः रश्मिरूपे व्राणे अस्य कर्म्मणि प्रथमपुरुषबहुवचनस्थानेल्कार
सन्न्रूपं अदृश्रमिति दृश्यन्ते अस्य सूर्यस्य प्रज्ञात कृतत्वात्केतवो रश्मयः केतुरिति प्रज्ञानना
मसु पठितं विरश्मिनर्थको निपातः अथवा अदृश्रमिति संबंधः जनान् अनु गताः भ्राजन्तो देदी

पमानाः कथंभूतास्त्वद्रूपं प्रति अग्रयो यथा अग्रय इव उपयामगृहीतोसि सूर्याय त्वा भ्राजाय भव
यगति हे सूर्य भ्राजिष्ठ यथा भ्राजिष्ठस्त्वं देवेष्वसि एवं भ्राजिष्ठोहं मनुष्येषु भूयासं विष्ठवनिष्ठ
ते गृह्णाति उदु त्यं जातवेदसं व्याख्यातं देवा षेत्त अप्सरोहिणी रोगै रभिमंत्रेण द्वाभ्यां स्तम्भा
महापंक्तिभ्यां द्रोणकलशमनुप्रायपत्त्याजिघ्र त्वा कलशं विदोपार्षं आ विशन्त्विति गोना
मस्तपतिन्ना भिमृशेत्मिनजिघ्रपेण कलशं हे महि किंच आत्वा विशन्त्विन्दवः आविशन्तु त्वामि
न्दवः सोमाः यएते द्रोणकलशं संवर्धिनः किंच पुनरपि ऊर्जा ऽन्नेन सहिता अस्मान्प्रति
निवर्तस्व यात्वामेवस्तमः सान अस्माकं सहस्रं गवायदेनदस्मानि ददस्व ननधुक्षाउरु निदीना
थः नस्तुनदेहि त्वत्प्रसादात्त्वं उरुधारा वरुधारा पयस्वती पयसा संयुक्ता पुनरपि मा आविश
तात् आविशन्तु रयिर्दनं ॥ दक्षिणे सदः कर्णे यजमानो जपति इडे रन्ते हे इडे इडानाम म
नोईहिता तया गोरूपमीयते इडे त्वमसि रन्ते रमयामीति रंता हव्ये हूयते नस्या विकाराः य
ज्ञेषु इति हव्या काम्ये मनुष्याणां एना हेता स्तु कामाः प्रविष्टाः चंद्रे चन्द्र इव आह्लादयतीति चं
द्रा ज्योते नेन स्यैव ज्योतिर्ज्योतिस्त्वा नस्य ज्योता अदिति अदीने सरस्वति सरस्त्युदकनाम सा त
न्वतीमहि महति विश्रुति विविधं स्तूयसे स्तूयसे इति विश्रुतिः एतानि ते न वहे अघ्न्ये
अहंतव्ये नामानि अतिशय गुणयुक्तानि तै रभिहितास्तनी देवेषु मां सुकृतं सुहृतन्त कारि

मं॰ त्र॰ भा॰ ७३

73

णं त्वयाह्वहि महाव्रतीयंग्रहंगृह्णाति विनइंद्रअनुष्टुप् इंद्रोविमृध्णएणस्तुक्कोदेवता विनइंद्रमृधो
जहि विनाशय नः अस्माकं हि इंद्रमृधः संग्रामात् किंच नीचायच्छपृतन्यतः येपृतन्यतः येपृ
तनाः संग्रामानिच्छंति येपृतन्यतः तान्पृतन्यतोमनुष्यान्नीचायच्छनीचै नीचैर्निगृह्णीष्वयश्च
यस्मान् अभिदासति दसउपक्षये उपक्षियति तंअधरंनिकृष्टं अथोअधंतमोगमय उपयामगृ
हीतोसीन्द्रायत्वाविमृध एषतेयोनिरिंद्रायत्वाविमृधेव्याख्यातं ॥ द्वितीयोमंत्रविकल्पः वाचस्प
तिंत्रिष्टुप् वैश्वकर्मणीमनोविश्वानीतितदः अवणायदोः व्याहारः कर्त्तव्यः निमसंवेयोह्रियन्त
देयंवाचोधिपतिं प्राणरूपेणवाइंद्ररूपेणवाविवक्ष्यते तस्मादाहुतिरिंद्रोवागितिश्रुतिः विश्वक
र्माणं सर्वस्यकर्तारं ऊतये अवनाय तर्पणायवा मनोजुवं मनसइववयस्यवः मनोजवः सएवमु
च्यते मनोगतिरित्यर्थः वाजे अन्ने अस्मिन्महाव्रतीयलक्षणेविषयभूते अद्यअस्मिन् घविढे
म आह्वयामः सनआहूतसन्नोस्माकं विश्वानि सर्वाणि हवनानि आह्वानानि जोषत् जुषतां से
वतां विश्वशंभूः शमितिसुखनाम सर्वस्यसुखेनभावयितात्रवसे अवसइत्यन्ननाम अस्मा
कमन्नदानायसाधुकर्मा उपयामगृहीतइत्यादिव्याख्यातं अपरोमंत्रविकल्पः विश्वकर्म
न् त्रिष्टुप्एषन्द्री विश्वकर्मणि हे विश्वकर्मन्त्वनेन हविषा महाव्रतीपलक्षणेन वर्द्धनेनच व
र्द्धयित्रा त्रातारञ्जगतः इंद्रं अकृणोः कृतवानसि अवध्यंचतस्मैचएवंप्रभावायेंद्रायविशोम

नुष्याः समनन्तरपूर्वे सन्तताः पूर्वे वसिष्ठप्रभृतयः इदानींतनाश्च पिस ना अयमेव वह्निरिं
द्रउग्रः उक्तः एवं वज्रः विहव्यस्त्व विविधेषु कार्येष्वाह्वयन इति विहव्यः यथास्तंच समर्थश्चाप्रम
यः यतः कारणादसन्तभवेत् हे विश्वकर्मास्त्वद्धविः सामर्थ्यादिंद्रस्यायंप्रभाव इत्यभिप्रायः
उपयामगृहीतोसीत्यादिकाण्डोक्तं अदाभ्यं गृह्णाति उपयामगृहीतोसि अग्नये त्वा गायत्रच्छंदसं गृ
ह्णामि एकं ग्रहणं इंद्राय त्वा त्रिष्टुप्छंदसं गृह्णामि द्वितीयं ग्रहणं विश्वेभ्यस्त्वा देवेभ्यो जग
छंदसं गृह्णामि तृतीयं ग्रहणं एवं सवनदेवताभ्यः स्वच्छंदस्कं सोमं गृहीत्वा अथेदानीमा
ह अनुष्टुप् हे सोम तेन वयं अभिगरः गृह्णतो अभिष्टवं इत्यर्थः यतः ऊर्ध्वं ठ' सवनेभ्यस्तदा
नुष्टुभमितिष्कृतिः ग्रहणायस्यास्व निग्राभ्यास्थ अश्रुतनाधुनोमि व्रेशीनां त्वा पत्मनोधूनो
मि मंत्रस्य व्रजनता उदरे शरेत इति व्रेषणः मेघोदरस्थाश्चापउच्यंते हे सोम व्रेशीनामपां त्वा
पत्मन्पतने आधूनोमि कंपयामि कुकूननानां त्वा कुङ् शब्दे असमर्थं कुर्वन्तः शब्दं कुर्वाणा नमनेन प्र
ह्वीभवंतीति कुकूननानामेव्याश्च आपः भंदनानां भदि कल्याणे सौख्ये च कल्याणकारिण्यः स्व
त्वयि श्रोवाभंदनाः मदिंतमानां अत्यर्थं मदयंति तर्पयंति मदिंतमाः माघोवन्तु ज्ञेगमः म
धुंतमानां अतिशयेन मधुस्वादोपेताः मधुंतमाः शुक्रंत्वा शुक्रमलिष्टकर्माणंत्वां शुक्रे
अलिष्टकर्मणि निग्राभ्यालक्षणे उदके आधूनोमि अह्नो रूपे दिवसस्य रूपे च तदपिशुक्रमे

त्र भवति सूर्यस्य रश्मिषु रूपमयस्य प्रकाशात्रूपत्वात् एवंभवति ककुभं रूपं वृषभस्य क
कुभं इति महान्नामस्तु पठितं अस्य सोमस्य लक्षणस्य वृषभस्य ककुभमादित्य लक्षणं रूपं रो
चते देदीप्यते बृहन्महत् प्रभावतः शुक्रः शुक्रस्य पुरोगाः शुक्र आदित्यः शुक्रस्य सोमस्य
पुरोगामी सोम एवं सोमस्य पुरोगामी भवितुमर्हति यस्मादतः कारणात् यत्ते तव हे सोम
सदाभ्य अनुवहिंस्यनाम जागृवि जागरणशील तस्मै त्वा गृह्णामि जुहोमि तस्मै ते तव हे सोम सो
माय स्वाहा तं सोममेवैतत्सोमाय जुहोतीति श्रुतिः अथ ७ अंशून् सोमे निदधाति उशिक् वशका
न्तो अस्य क्विप् उशिगिति भवति यतः उशिकः कान्तः वल्लभः त्वं हे देव सोम अस्माकं अन्तो अग्नेः प्रि
यपाथः अन्नमपीहि अपिगच्छ आवृणीतं वशकान्तो पोषयित्वा त्वोतमस्मान्स्वाः अस्माकं सखोप्र
गुणे सत्रोन्याने देवानामार्षिगार्हपत्ये अग्नावाहुतीर्जुहोति इह रतिः उक्तो मन्त्रः पशवो नियम्यन्ते
इह यजमानेषु भवतो रतिः रमणं रत्नानि संयमनकर्म्मो यत एवं अन्तरिह वरमंधं इह धृतिर्भूया
त् इह स्वधृतिः यत एवं अन्तरिह वचसा धुधारणं भूयात् पशूनां यजमान विषया धृतिः प्रार्थ
ते द्वितीयां जुहोति उपसृजन् तउष्णिक् आग्नेयी उपसृजन् संसृजन् धरुणं धारयितारमग्निं मा
त्रे पृथिव्यै मातात्र पृथिव्युच्यते धरुणः धारयिताग्निर्मातरं पृथिवीं धयन् पिबन् रायस्पोषं पश
वो वै रायस्पोष इति श्रुतिः पशून् अस्मासु दीधरत् अनेन धारयतु ॥ सत्रस्य ऋद्धिं गायति सत्रस्य ऋद्धि

यत

रसि बृहतीयजमानानां सत्त्वः सत्रस्य समृद्धिस्त्वमसि यतो गन्म आगताः ज्योतिरादित्यलक्ष
णं अमृता अभूम अमृताः दिवं अथारुहाम अध्यारूढाः पृथिव्याः सकाशात् द्युलोकं चाध्यारूढाः
स्मः अविदाम देवान् जानीमः पश्यामो देवान् स्वः स्वर्गं पश्यामः ज्योतिरादित्यलक्षणं अवि
दाम एतदनुवर्तते ॥ दक्षिणस्य हविर्धानस्याधोऽन्तं सर्पति युवन्तमिन्द्रापर्वता अतिछंदः
ऋषिः अन्त्या ष्टिर्वा अवसाना ऐन्द्री प्रथमोऽर्द्धर्चः ऐन्द्रापार्वतः हे इंद्रापर्वतौ युवां तमनुतिष्ठता
येन यत्नेन पुरोयुधा पुरोऽग्रतो युध्यति तं पुरोयुधं तेन पुरोयुधा बलेन यो नः पृतन्यात् अ
पतं तमिद्धतमिति तदो वीप्साऽप्रवणात् पदोऽपि वीप्सा क्रियते यः शत्रुर्नोऽस्मान् पृतन्यात्
संग्रामयेत् योधयेत् अपतं तमिद्धतं अपहतं विनाशयतं शत्रुं इद्धेऽनर्थकः वज्रेण तेन इह
त वज्रेणान्यायुधनियमः शत्रूणामुन्मूलनाय व्याख्यातमन्यत् इतउत्तरमिदं अस्मदीयो वज्र
स्य कर्तुं विविदितं परोऽन्तस्य मन्तः दूरे च गमाय च्छेत् चतति गतिकर्मा दूरे गतायतनस्य
यस्मोऽत्र वेच्छेत् च्छदति कामनार्थः कामयतां हे इंद्र त्वदीयो वज्रः शत्रवे विनाशं कामय
तां इति चेत् आस्मे षां रथ्यो भवति आत्मा अश्वः आत्माश्रयः युधमित्यदोषः गहनं यदि न द
त् गहनं वनमुच्यते उदकं वा इनक्षत व्याप्तिकर्मा इनक्षति नक्षन् इति रूपस्सा ऽदृश्यात्
उदकं वनं वा यं इनक्षत् व्याप्नोति शत्रुर्यद्रूपेण तस्यापि विनाशं कामयतां त्वदीयो वज्रः अ

मं॰भा

७५

75

स्माकंशत्रून्परिस्पृरविस्वनोदर्भोदर्षीष्टहेस्पृरत्वदोयोवज्रः अस्माकंयेशात्रवःतान्परिदर्षिष्ट स्
विदारणेषुपरिविदारयन् कथंभूतोवज्रः दर्भोविदारणशीलः कुतोवस्थितान् शत्रून्विश्वतः
सर्वतः हेइन्द्रत्वदीयोवज्रः शात्रवेविनाशयत्विति जपतिभूर्भुवःस्वः सुप्रजाः प्रजाभिःस्याम
सुवीरावीरैःसुपोषाःपोषैः एकवचनान्तोव्याख्यातः इहतुवहुवचनान्तः शात्रोत्थानसमाप्ता॥
परमेष्ठ्यभिधीतः आग्रयणसमाप्तेनैमित्तिकानिवक्षिष्टस्याः परमेष्ठ्यादिस्पृतिः चतःत्रिंठं
शत्सुसोमावस्थासुचतस्त्रिंठंशाहदेवताभिधायिनीऋक्त्रयाभिधीतः अभिध्यातः संकल्पि
तोयजमानेनसोमानयनमेतत् वचोभिर्व्याहृतः अहंसोमेनयदेरन्तुकंभवति अक्तेतःअक्ता
भेतानांभ्रभिंतिशाकपूतोसोममभिइतोगतः सोमव्याप्तमितोगतः अस्योऽन्त्रमुच्यते सवि
तासत्योसत्तोति संभजनार्थः सोमसंभक्तोसत्योसलिलपुष्पतोपवित्रमत्रः शेषंप्रगुणं
स्कन्नमभिमृशति ययोरोजसावैस्कम्बवारुणी त्रिष्टुप् ययोविष्णुवरुणयोः ओजसावलेनस्कं
भितारजांसि स्कंभेस्ति संभनार्थः लोकारजांस्युच्यन्ते स्कंभितालोकानचलन्ति योचवीर्यैःस्व
कीयैःवीरतमोसावविष्टोवलिष्ठोचयोचश्पेनाविंवपरवलेशुपतनः अप्रतीतोअप्रतिगतो
अनमास्थितो सहोभिःस्वकीयैरवैनवलेस्तोविष्णु वरुणोतुल्यकार्यत्वात् उभावपिविष्णु
वरुणौ द्वितीयाद्विवचनमेतत् अगतअगच्छत्गतोयज्ञःयत्तसाधनभूतेस्कन्नेद्रव्येयत्तशाहे

नोच्यते पूर्वकृतो पूर्वस्मिन्नाकाले यावत्तथा नं न कृयते तावद्विस्तुवरुणो प्रतियत्तो गत इत्यर्थः
यद्वा पूर्वकृयते इति पूर्वकृतो विस्तुवरुणो प्रतिगृगन् गतो यज्ञ इति संबंधः ॥ द्वितीयो मंत्र
विकल्पः देवान्दिवं देवान् आप्यदिवं द्युलोकं अगन् अगय कृतो यज्ञः ततउ मंत्रफलं आमो
तु अस्मान् अपिच यंकंच लोकं गतो यज्ञफलविशेषः ततो लोकान्मे मम भद्रमभूत् भवतु
महावीरभेदे होमः चतस्त्रिंत्यक्ति वीत्रिष्टुप् वाचतस्त्रिंशात्तं ततो यज्ञस्य परमेष्ठ्यादयोय
ज्ञं वितत्विरे वितन्वन्ति येच इमं यज्ञं स्वधया आत्मेन ददन्ते तुष्यन्त्यथीस्य तुष्यन्ति तेषां वितन्व
तायच्छिन्नं तदेतस्त्सदयामि उकारो नर्थकः स्वाहा स्वकृत नमस्तु यमो महावीरो देवान् अपिगच्छ
तु यज्ञस्य दोह इति वाचयति त्रिष्टुप् प्रथमे· द्वितीये परोदीयन्ते द्वितीये प्रत्यदीयन्तं ज्ञोवाको
परिश्रुतिः क्रियते प्यासोम वयज्ञस्य सतः दोहः प्राकृतिपरिणामो वितनतः प्रसारितः तु रुद्रा
वाकृयाब्रलादिस्तं वपर्यन्तो भूतग्रामो यज्ञपरिणाम इत्याशयः सपवदेहोदिभेदेना ष्टुप्
विद्यमानो द्युलोकमन्वाततान भूमिमंतरिक्षं च वाप्यद्युलोकमन्वाततना सत्वं यज्ञपुत्र प्रदत्तं
दोहं महिमहान्तमेमममप्रजायां अहं च रायस्पोषं धनस्य पुष्टिं विश्वं सर्वं च आयुराशीय ब्वा
मृयां तत्प्रसादात् धोक्ताव दोहरेण इयमस्य होममंत्राः आपवस्व गायत्री सोमी पावमानी होसो
म आप्रवस्व प्रदत्त रहिरण्यवत् क्रियाविशेषणमेतानि हिरण्यसंयुक्तं अश्ववदश्वसंयुक्तं वी

मं॰ भा॰
७६
76

रवद्वीरैस्संयुक्तं वाजमन्नं च गोभिस्संयुक्तं आभर हृग्रहोर्भश्छन्दसि हस्य इति हकारस्य भकारः अ
कृपणमाहर ॥ इति कृष्णरक्तनीमंत्रभाष्येऽष्टमोऽध्यायः ॥८॥ ॐ देव सवितः वाजपेयिका मंत्राः
एषते निर्ऋते भाग इत्येतस्मात्प्राक् गृह्यन्ते राजसूयस्य वा कर्मणः पुरस्तादाहुतिं जुहोति सा
वित्राविष्टुभा हे देव सवितः प्रसव अभ्यनुजानीहि वाजपेयलक्षणं यज्ञं अनुजानीहि यजमा
नं यज्ञपतिं भागाय भजनीयाय यज्ञफलाय एवं प्रकृष्य अनुज्ञाप्येदानीं मण्डलमध्यगतं पुरुषमा
ह त्वत्प्रसादाच्च मण्डलवर्त्तिनो दिव्यो दिवि भवो गंधर्वो गवां वाचां रश्मीनां वा धारयिता केत
पूः केतनशब्देनान्नमुच्यते अन्नस्य पविता केतमन्नं नोऽस्माकं पुनातु शोधयतु त्वत्प्रसादात् वच
वाचस्पतिः प्रजापतिर्वाजमन्नं नोऽस्माकं स्वदतु स्वद आस्वादने आस्वादयतु पंच वाजपेयं का
ग्रहा गृह्यन्ते ऐन्द्राः ॥ ध्रुवसदं त्वा सोमाहुतिपरिमाणमभूतो रसः पशुलोकेषु वर्त्तमान इव
गृह्यते सोमाध्यक्षः ध्रुवेऽस्मिंल्लोके सीदतीति ध्रुवसत् तं ध्रुवसदं त्वा नृषदं मनुष्यसदं म
नसि सीदतीति मनःसदं इन्द्राय त्वा जुष्टमभिरुचितं गृह्णामि उपयामगृहीतोऽसि इति ग्रंय
ष्टनेया भिन्नक्रमः आदौ मंत्रावयवो नू[illegible]ः ध्येसवं पात्सादयति एष ते योनिरिन्द्राय त्वा ममभिरुचित
नम द्वितीयं गृह्णाति अप्सुषदं उदकसदं त्वा घृतसदं व्योमसदं व्योमशब्देनान्तरिक्षमभिधी
यते शेषं व्याख्यातं तृतीयं गृह्णाति पृथिविसदं त्वान्तरिक्षसदं दिविसदं देवसदं नाकसदम्मि

रव्या

ति कमिति स्तवनाम तन्मतिषिद्धं प्रतिषिध्यते यत्रगतानामल्पमप्यसुखं न विद्यते स नाको लोकः

स्वर्गो लोकविशेषः शेषमनु च तं त्वा गृह्णाति अपां रसं रसदेवत्यमनुष्टुप् रसस्य सारः सोऽपां वायुः प

षवा अपां रसो यो यं यवन्ततिष्कृतिः उद्वयसं उद्गतं वयो अन्नं यस्माद्द्वयोस्तमुद्वयसं वायुः सूर्ये स

न्तं समाहितं तस्मान्नयोः पदयोर्कं तयोः अर्थसंबन्धात् सूर्ये समाहितं सन्तं समारोपितं सन्तं गृह्णा

मीति वक्ष्यमाणेन संबन्धः अपां रसस्य यो रसस्तं वो गृह्णाम्युत्तमं अपां रसो वायुस्तस्यापि रसः

सि प्राणेनेन यथकारो भावप्रत्ययार्थः हे वायो तस्मै कस्मै प्रजापतये तत् भं इयं पृथिवी वषट्कृतं अस्तु वष
ट्कृता भवतु नो हे नाव त्वमाकृतिरस्ति यथेष्टेति श्रुतिः ॥ आस्तीर्णे यो रंतानं गृह्णाति सुजा
तो ज्योतिषा अनुष्टुवाग्नेयी अयमग्निः सुजातः ज्योतिषा सह शुक्रः शर्मशरणं वरूथं वरणीयं गृहं
आससदत् आसीदत् स्वः स्वर्गाख्ये योक्रमन्त्रसनि वासो अग्ने हे अग्ने विभावसो विभूतधन वासो
विश्वरूपं विचित्ररूपं संव्ययस्व वेजं संवरणं परिधत्स्व अथैनमादायोत्तिष्ठति उदु तिष्ठ आग्नेयी
बृहती उत्तिष्ठ उकारः पादपूरणः हे अध्वरस्य यत्निय तत्र उत्थाय च पालयन्तः अस्मान् देव्या धि
या देव्या बुद्ध्या किंच दृग्भ्य सदृक्च दर्शनाय च अस्माकं भासा बृहता च सुकृतिः साधुस्तवा चासंदी
मः आयाहि आगच्छ हे अग्ने सुशस्तिभिः साधुशिष्टैः स्तवैः अथैनमित ऊर्ध्वं प्रीं च गृह्णाति ऊर्ध्व
ऊ षु णः बृहती आसे षीऊर्ध्वस्तिष्ठ । ऊतये पादपूरणेन ऊतये अस्माकमवनाय देवो न सविता न
कारउपमार्थीयः देवइव सविता ऊर्ध्वः स्थितो वाजस्यान्नस्य सनिता संभक्ता भविष्यसीति शेषः



यदं जिभिः यस्मादंजिभिर्व्यंजकैर्ईश्वाणां रश्मिभिर्वायश्चिर्हविषां वोढृभिः सहितं त्वां विकयामहे विविधमाकयामः यस्माद्दंक्ति हेतिसंवंधः ॥ अश्वमभिमंत्रयते सजातोसित्रिष्टुप् अग्नीकमाश्व स्तौति अथवाहारव्यावहितपदश्चायोमंत्रः यस्त्वरोदस्योर्द्यावापृथिव्योर्गर्भो जातोसि यस्त्वं हे अग्रेवा रुः शोभनः विभृतः हृत्यग्रेर्गर्भः छंदसि हृस्येति हकारस्य भकारः ओषधीषु परोउ शादिलक्षण स्तदानत्वा विषयास्तभवसि यस्त्वंचित्रोनानारूपः शिशुः शंसनीयः परेणतमांसि अक्तून रात्रीः अतिरोचसे सत्वमातृभ्य ओषधिवनस्पतिभ्यः सकाशात् कनिक्रदत् अत्यर्थशब्दं कुर्वन् गाः प्र याहि रासभमभिमंत्रयते स्थिरोभव उस्त्रिगनुष्टुब्वा स्थिरो निश्चलो भव स्ववदः स्वास्यं यस्य अभ वयत्स्तमग्रेः पुरीषवाहणः पशव्यं पयसं वहतीति पुरीषवाहणो रासभः ॥ अजमभिमंत्रयते शिवो भव अनुष्टुब्वाहहतीवा हे अज शिवः शांतो भव प्रजाभ्यो मानुषीभ्यो वा यस्त्वं हे अंगिरः अं गिरा उ अग्रिराग्रेयोज इति श्रुतिः माचत्वं माद्यावापृथिवी अभिशोचीः अभिसंतापय माचांतरि क्षं माचवनस्पतीन् एतेषामस्मनामपरिशृक्ताति ॥ प्रैतुवाजि अवसानां महापंक्ति अर्द्धर्चात्रयं अश्व देवत्यो एतु आगच्छतु वाजी अश्वः कनिक्रदत् अत्यर्थं हेषितशब्दान् कुर्वन् अयं च रासभो स्वय वसस्तेवनार्थप्रकर्षेणैवागच्छतु नानदत् सोयशा समुच्यते गर्दभ रटितेन सर्वाः दिशो नादयन् रासभः पताया पतनशीलः तरत्स्वसायनु षिरासभं निराहतद्रासभेण वदत्यानीति श्रुतिः भरत्नग्रि पुरीष्यमयं वा स्पोभरन् रयन् अग्रिपुरीष्यं पशव्यमापादिमाविनश्यत् आयुषः पुरा आयु

विद्धं गच्छदृ ठौ अजन त व नाशु श्रुः ग्रिषा नचवाजी वेज तवां अनवहे नवि नि पद्मार्थं प्रती तिया

ती हि नस्त्र वी वु घुः एथु मनव ७

गर्भ

मं·त्र·
भा·
९०

97

पृथग्ग्रहेनकृत्यात्रकर्म्माभिहितं यत्संयोगेनहिरण्यादीनांस्कन्ति: आ ओषधः उरा आसमाप्तेः कर्म्मणः
दासभेउच्यते वृषासेक्ता वृषणंसेक्तारं आकृतिपतित्वममभिप्रेतोक्त भरन्धारयन् अपांगर्भमग्र
पांमध्येअवस्थानात्गर्भइत्युच्यते समुद्रियम् त्रयोहवैसमुद्राअग्निर्यजुषां महाव्रतं साम्नाम् महदु
क्थमिचामित्येतदभिप्रायंतत्रभवः समुद्रियः तासमादाहरति अग्न आयाहि एकपादाग्नेयीगा
यत्रीहे अग्ने आगच्छ वीतयेहविरुपभोगाय छागस्योपरिस्थाप्ययजमान ऋतंसत्यं ऋतमग्निः स
त्यमादित्यः यद्वाआदित्यः ऋतंअग्निःसत्यंउभयरूपमभ्याहरामीतिशेषः अनड्वाहं ऋषभीकृते
अग्निंपुरीष्यंव्याख्यानम् उपावहरति ओषधयः प्रतिहाभ्यामित्युष्टवन्तुष्टुआ ओषधयिदेवत्याभ्यांद्वि
तीयोर्द्धर्चः आग्नेयः हे ओषधयः प्रतिमोदध्वंप्रतिहर्षयत प्रत्युत्थानादिभिः अग्निंपतंशिवंशा
न्तमायन्तं अभ्यायुष्मा: युष्मानभ्यागच्छन्तं अत्रैवस्थितानानामेवमर्द्धर्चेनओषधीमुक्त्वाथद्वा
नीमग्निमाह त्वमपविश्वाः सर्वाअनिराः इरान्ननामनभवति अन्नंयाभिः आवृष्टि
रतिदायाशनिप्रमतिगृह्यन्तेविदितपरं अमीवाः व्याधीन् निषीदन् निविशमानः अपदु
र्म्मतिंजहि न: अस्माकंअपजहि अपनयइत्यत्रतिमातित्वदन्तेनात्तिकृतमित्येवमादिकाहेओ
षधयः पत्नमग्निंप्रतिगृह्णीत आदरवत्यउष्णवतीः सुपिप्पलाः पुष्पवत्यः शोभनफला
श्च भूत्वाः यंवःयुष्माकंगर्भः ऋत्वियः ऋतवः प्राप्तकालस्प्रत्नउराणंसोप्रतिकसध
स्यसहभवस्थानंआसदत् आसीदति अश्वेनविष्णुमितियाज्या वीतयः सुपसर्गाः वाथहे

९७

अनेनसंबध्यतेविबाधस्वपाजसापाजइतिबलनाम बलेनधृष्णुनाविसीर्णेनशोभमानोदीप्यमानः द्वि
षद्वेषिन्रक्षसः अमीवाः व्याधीन् एवंअस्मदंयाचित्वाः अथेदानींपरोक्षीकृत्याशिषः आशास्तेसुप्रणि
णीः साधुशरणस्यबृहतः महतः शर्मणिशरणेस्याभवेयं अग्निरंसुहवस्यस्वाह्वानस्यप्रणीतौ
प्रणयनेअभ्यनुज्ञायाम् अपउपस्रजति आपोहि अत्रैवजमस्त्वः गायत्री आपोहिष्ठामयोभुवः
द्वितीयपादेतत्रवणायदोध्याहारः हेआपः याः स्थयंमयोभुवः मयइतिसुखनामसुखेनभा
वयित्र्यः स्थभवथसर्वप्राणिनांछंदः पतिपूर्तिकरोहिशब्दः ताः नोऽस्माकंऊर्जेअन्नायदधातन
स्थापयत यथावयंसर्वस्यभोग्यस्यभोक्तारोभवेम तथाकुरुतेत्यभिप्रायः महेमहतेरणायरम
णीयायचक्षसे दर्शनायअस्मान्दधातनेमनुवर्तते एतदुक्तंभवति महच्चयद्दर्शनंपरब्रह्म
लक्षणंरमणीयंयत्तदस्माकंकुरुतेति अथवाहिशब्दोयस्मादर्थेकृत्वाव्याख्यायतेनोहिवद
मात्रामात्रस्यानर्थक्यमिष्यते संभवेसति हेआपः हियस्मान्मयोभुवः तानऊर्जेताशब्दस्य
पंचम्यांसंनतितस्माद्धेतोः अस्मान् अन्नायस्थापयतमहतेचरमणीयायचक्षसेदर्शनीययो
वः यश्चवः युष्माकंशिवतमः शान्ततमोरसः तस्यभाजयतभागिनः कुरुतइहैवास्थितान्नः
अस्मान्उशतीरिववशकांक्षोत्कृतसंप्रसारणेस्येतद्रूपं कामयमानाइवमातरः मातृशब्दः सं
बंधिवचनः यथाकामयमानाः मातरः पुत्रकल्याणेतेषांकृतसंप्रसारणेस्येतद्रूपं कामयमाना

मे॰ त्र॰
भा॰
९८

98

इवमातरः मातृशब्दः संबंधिवचनः यथाकामयमानाः मातरः पुत्रकल्याणं तैस्तैरर्थैर्भोजयेयुः एवंभा
जयत तस्मा अरम् अलमिति प्राप्ते लकारस्य रेफः छांदसः ॥ हे आपः तस्य च रसस्य आपस्तनं मत्र पठि
तस्य वः युष्मत्संबंधिनः अलं पर्याप्तिं गमाम गच्छेम षष्ठ्यं पर्याप्तिर्नाम रसस्य विषये वैतस्य सदातृप्ति
वीयस्य क्षयाय जिन्वथा क्षयो निवास इति आद्युदात्तः षष्ठ्यर्थे चतुर्थी यस्येति सामानाधिकरण्या
त् यस्य च्यातिपरिणाममगतिभूतस्य निवासक्षयस्य एकदेशेन जिन्वथ जिन्वतिः प्रीतिकर्मा तर्प
यथा पंचाकृतिपरिणामक्रमेण देवब्रह्मादिस्तंबपर्यंतं जगत् तत्र च हे आपः जनयथा च नः अस्मा
न्मोक्षतेन आजानदेवत्वमापास्यते अजलोमभिः संसृजति मित्रः संसृज्य मैत्री उपरीष्टाद्बृहती
अनुष्टुप् अथर्वण आह मित्र आदित्यः संसृज्य एकीकृत्य पृथिवीं द्युलोकं च विदं अयमत्र भूमिवचनः पृ
थिवीशब्दः इहतु द्युलोकवचनो गृह्यते पृथिवीं द्युलोकं भूमिंद्र मां ज्योतिषा अजलोमभिः सह
संसृज्य मह्यं प्रयच्छत्विति शेषः अथ यस्मा अग्नये त्वा सुहृलोमानि ज्योतिः शब्देन भणितुं शक्यंते अहम
पि च गृहीत्वा सुजातं कल्याणजातं त्वां जातवेदसं जातप्रज्ञानमग्निमजलोमाख्यं संसृजामि अय
क्ष्माय अव्याधितायै प्रजाभ्यः प्रजानामिति संततिः शार्कराया रसाश्मचूर्णैः संसृजति रुद्राः संसृज्य
अनुष्टुप् रौद्री रुद्राः संसृज्य एकीकृत्य शार्कराया रसाश्मचूर्णैः पृथिवीं पार्थिवं पिंडं बृहत् महत् ज्यो
तिः अग्निलक्षणं उखायां समीधिरे संदीपितवंतः उखायामग्निं संवत्सरं धारितवंतः तेषामिदानीं

मह्यतिउखांदधात्वित्स्थापयतु हस्तयोः उखांकृत्स्नांतुकरोतु शच्यासामर्थ्येनवाहुभ्यां अदितिः ८

म्फलमाह तेषांरुद्राणांमातृर्दीप्तिः अजस्त्रइत्र जस्त्रउपक्षेपे इत्यस्यशब्दपर्वर्थिअनुपक्षीणपव
सुलक्षः देवेषुनिर्ह्रारणेसमसी रोचतेदीप्यतेतिस्त्रभिरनुष्टुभिः सिनीवाल्यादिभिः मृदंसंयौति सं
सृष्टांसंयोवितांवसुभिः रुद्रैश्चधीरैश्चबुद्धिमद्भिः धीशब्दोबुद्धिवचनः कर्मण्यायाकर्मयासं
पद्यतेसाकर्मण्यातांकर्मण्यां मृदंमृत्तिकांहस्ताभ्यांमृद्वीकृत्वासिनीवालीकृणोतुकरोतु या
सिनीवालीसुकपर्दा केशसंयमनप्रकारः साधुकेशसंयमनोवलिर्वाकपर्दः सुकरीरा कु
रीरोमुकुटो स्वौपशाशोभनप्रकाशनेयासास्वौपशाविदग्धाशयने करकारणकृजितादि
भिर्विलासैः सातुभ्यंहेअदिते महिधियायुष्माचकृतवतीमातापुत्रंयथोपस्थेउत्संगेअभिवि
भर्त्तिधारयतुगर्भेआकारआत्मनोयोग्यांक्रियामतिपति आधायगर्भशब्दउरवाभ्यंतरवचनः
मृत्पिंडमादायमखस्ययज्ञस्यशिरोसि आहवनीयोयज्ञस्यशिरः तद्धारणादिदमपिवर्ण्यतेलक्षण
याशिरःशब्दः तंप्रथयतिवसवस्त्वाकृण्वंतु वसवस्त्वांकुर्वंतुइत्युखेगायत्रेणछंदसाअंगिरस्व
तु यथांगिरस्कृतायतत्वकृतासतीध्रुवासिस्थिरासि पृथिव्यसि पृथिवीवासियतः अतस्त्वा
ब्रवीमि धारयामयिस्थापयाम पिप्रयजमानायेतिचतस्यैतंपदसहपरिशिष्ठाकृत्येनेनदिहसमसं
तंकृत्वायोज्यतेसामानाधिकरण्येनात् यजमानप्रजांधारययन स्पयपुष्टिंगोपतित्वंशोभनवीर्य
वीरकर्मासजातान् समानजातान् आत्मनधारयेतिसर्वत्राभिसंबंधः उखेरुविशेषः रुद्रास्त्वा

मं॰ त्रा॰
भा॰
५५

99

श्चेनरिक्षमसिआदित्यास्त्वाद्यौरसिविश्वेत्वादेवावैश्वानराः विश्वंनरंनारयंतीतिवैश्वानराः दिशो
सीति ॥ विलंतीयेकृष्णरेवतिम्नमर्वतः करोतिअदितिष्ट्वारास्नासि आत्मीने विलंगृह्णाति अदितिः
अदितिरदीनादेवमाता ते विलंमध्यंगृभ्णातुनिर्द्धानंकृत्वा यसाउख्विगन्तृश्वअदितिः उपरुयुणा
याः कृत्वायमितियकुर्कादसउपजनः कृत्वा महीमहतीउखा मन्मेयीयोनिस्यानेअग्नये अम
र्यपुत्रेभ्यः मायक्षतमादातस्त्रयपात अपयंत इतिकरणः प्रयोजनव्यापनार्थः ॥ सप्तभिरुखा
शकृद्भिः अभ्यधूपयति सप्तभिर्यजुर्भिः प्रतिमंत्रं वसवस्त्वा कृण्वंतीतियजूंषि अभ्यः स्त्वधूव
नति अदितिस्त्वादेवीविश्वदेव्यावती विश्वैर्देवैस्सहिताप्रथिव्याः सधस्थाने अंगिरस्वत्खन
तु [illegible] देवस्वटहृपा उखामवदधाति देवानांत्वा पत्नीस्त्वाग्नातियेयातिव्याख्यायंते ग्रावध्यो
देवानांपत्नः दधतस्यापयत उखे अग्निनादीपयति धिषणास्त्वाधिषणा वाचइ इयता
इत्यादीन्मेः जपति वरूत्रीष्ट्वा अहोरात्रीणिवरूत्रयः ग्नास्त्वादेवीः छंदांसिवैग्नाः छंदो
भिर्हिस्वर्गलोकंगच्छंति जनयस्त्वाच्छिन्नपत्राः वैजनयः अच्छिन्नपत्राः अच्छिन्नपतना
सततपायिनः आचरंति मित्रस्यचर्षणीधृतः मैत्रीगायत्रीमित्रस्यादित्यस्य चर्षणीधृ
तः चर्षणयोमनुष्याः तेषांधारणेअधिकृतस्यश्रवोदेवस्य श्रवः रक्षणं सानसिसमा
नतपुराननं पुराणं धनंच यशस्विचत्रश्रवस्तमं अतिशयेन श्रवणीयंच वर्षीय

४

त्रिवायद्धाय स्यामित्रस्य चर्षणी धृतः पात्तलं त्द्वेस्यमुग्राम त्निषु म्नचित्र श्रवस्तमंयजस्तात मा
जिघ्रत मस्थे साधयन्तु इद्धयन्ति त्वस्त्वा दृढ़तीज मो रेवः स्वाङ्गति त्वांमवतं इद्धयन्तु उद्ध मने नप्रकाशी

मः याचेमही स्वगुति शोभनांगुलिः लकारस्य रेफउक्तोदसः स्ववाङ्गः उतशास्त्राश्च पिश
न्ना उतशाह्वः समञ्चयार्थः उद्वपतीम्यनुवर्तते त्वंच सविता उद्वमा सती श्रवण्यामाना श्रव
त्नेती पृथिवीं श्रास्थिता श्राशाः दिशः विदिशाश्च श्राहण दरयश्चाकृतिरसेनास्त्रयउ
पठन्ति उत्थाय हवींद्वैवेउत्यउमनेशमेत्रः एतस्माद्यजनस्यानाउत्थाय दृढ़तीमहतीभ
वन्तउतिष्ठ प्रवर्त्तय स्वकीये कर्मणि यतस्त्वंपत्वास्थिरामिस्वभावतः पात्रे करोति हे
मित्र एतांतेतनउर्वापतिंदद्दामि प्रयच्छामि श्रभिन्नेश्रभेदनाय एषाचउर्वा तयाहहोना
सतीमाभेदि माभिद्यता श्रात्स्रणंति वसवस्त्वा निगदव्याख्यातम् श्रनृभणनिजहाति श्राकूति
मग्निम् श्राकूतंवलमाकूतिः श्रात्मनोधर्मो मनसः प्रेरणहेतुः प्रयुक्तेन कर्मणा प्रयुक्त स्वाहा
स्वकृतंकरोमीति व्याख्यातं नमः स्वस्तीत्यादिनाउपपदविभक्तिश्च चतुर्थी श्राकूत्यैश्रग्नेय प्रयुज
स्वाहा एवमपरितनाश्रपिमंत्रा व्याख्येयाः मनोमेधां मनोमनसः प्रवृत्तिमेधायः स्व चित्तंविज्ञातं
ततश्च चित्तस्य संस्कारस्य वाविज्ञानस्य प्रवृत्तिः वाचोविसृतिम् ततोवाचोविधारयिताग्निः प्रका
शकोभवति प्रजापतयेमनवेमन्त्रनुकारिणे श्रग्नयेवैश्वानराय इत्याय ॥ विश्वोदेवस्येति व्याख्यातं
उर्वामाहेतिकृतिः मासुभित्था इति गायत्रीविष्टुब्याउर्वादेवस्याग्निवेदमितिपाद श्राग्नेयश्च
हेउर्वेमात्वंभित्थाः भिदिरविदारणेभियस्व संकारोनर्थकः माचरिषः रिषतिर्हिंसाकर्मा माच

श्रीमद्गुरुमुख्यपादानां श्रीमन्नयपाणिः १

मं·त्र·
भा·
१००

100

विनष्टपउत्तरं स्वदेह अंव अंवेति वेयोस्वायाः आमंत्रणम् हस्तु हष्टं प्रगल्भं वीरयस्वा वीरकर्मकुरुष्व
अस्मधारणलक्षणं किंच अग्निः वलदं कर्म आसमाप्तेः करिष्यथः एवं हष्टं हृस्व देवि हेड
ऐव हष्टं हृस्व हर्षकुरु आत्मानं देवि हष्टपिविकार्ये कारणोपचारो वर्णानार्थः स्वस्तये अविना
शाय कस्मात्तामिदमुच्यते यतः आसुरीमाया अस्तः प्राणेरेक उपचयः प्राणसंबंधिनी मायास्त्र·
त्रासधयाच्यनेन निमित्तम् तेन कृतासि किंच जुष्टप्रियं देवेभ्यो हृतं इदं हृअं हविः असि तव
त्वसादात् या उरवा खेः प्राणाकृत नयोक्त यं ते ताउच्यते तमपि अरिष्टा अनवत्वं विता उदिहि उरुक्ष
यते अस्थितं वर्तमाने उखेः ग्रोत्रयोदश समिध आदधाति त्रयोभिराग्रेयीभिः ऋग्भिः हे गायत्र्यो
इन्तः सर्पिराहुतिः दातं अत्र यस्य सद्र्नः सर्पिर्हुतमासवस्थानीयं यस्य सर्पिरासुतिः प्रलः
श्वराणः होतादेवानामाक्रान्ता वारेण्यः वरणीयः सहसस्पुत्रः वलस्यपुत्रः यतो मथ्यमानो
जायते तस्मादेवमुच्यते अद्भुतः अनन्यसमः यः हंत्यभूतोः भ्रिः सकामं की समिधं भद्रयति
तिशेषः न यथाख्यानं विद्यते न चाख्यानेन विना वाक्यपरिसमाप्तिः वैकंकतीमादधाति पर
स्याअधिसंवत इति संग्राम नाम सुपठितं संश्वसंवनते गान्यस्य संगछते हि तत्र योधाः प
रस्याः संबंधिन्याः संवतः अधिसकाशात् अवरान् अपातरूअभ्यागछ ततो यत्र जानपदे
अहू अस्मितान अवपाल्य तर्पयवा औडुंबरीमादधाति परमस्याः तिस्रो अनुष्टुभः परा

१००

वनइति हरनामसु पठितं परमस्याः परावतः परंपरूपं हरंतस्मात् हे रोहिदश्व रोहितो हि अग्ने
रेशः इहआगहि आगच्छ यतस्त्वं पुरीष्यः पशव्योसि पुरुप्रियस्य बहुप्रियस्य अंगेवरेवव
हृस्मेवाशनानि नयेन हन्नीसर्वान् वनस्पतीन प्रतिहृत्यानइतिश्रुतिः आगमचेरे अग्ने तन
गविनाशाय मथः संग्रामान् अपरस्मृहल्लामादधाति यदग्ने यत्कह्ः दध्यसीग्मनेनसंव
धयते यदादधासि यदादधः हे अग्ने नवदारूणि कानिचित् विकटानेवल्लमा यानिकानि
चिदित्यभिप्रायः सर्वतद्धस्तु नवघृतम् तज्जुषस्व सेवस्व हे यविष्ठ स्वार्थे यप्रमयः पुवनम
स्थः शयमादधाति यदत्ति यदभ्यवहरतिकाष्टम् उपजिह्विकोपचीटिका यद्ववम्रः वल्मी
कः अतिसर्पति अतीत्यानुवर्तते सर्वतदितिव्याख्यातम् पालाशपदमरेभवंति अहरहः वि
ष्टभो अस्मिन्मंत्रे द्वितीयचतुर्थयोः पादयोर्विरोधः अश्वायेवतिष्ठतेघासमस्मैतिष्ठतेअसे
परेपरोत्तमग्रिं ह्वतः तथाअग्नेमोतप्रतिवेशा रिषामेति अग्नेतेइति प्रमदतमग्निं ह्वमः ते
चवाक्यभेदेनार्थः सम्भवति अतो द्वयोर्लीलाणिकयाह्यसाख्याख्याते अहरहः सततं अश्व
याववभरंतः आहरंतः अशनानि कथामिवतदुपमयादर्शयति अश्वायेवतिष्ठते अश्वस्येव
स्थापयंतोवयंघासंयवसं अस्मैतव किंच रायस्पोषेण दक्षिणालक्षणेन धनस्पोषेणस
मदंतः उत्साहयंतः ॥ इषायग्नेनवसंमदंतः त्वोहेअग्ने मारिषाम माविनश्येमाहि तेनव प्र

सं॰ उ॰ भा॰ १०१

तिवेशाः प्रतिवेशिकाः स्वाहाग्रयाइमर्थः अध्याहारेणयाव्याख्यायते अहरहरप्रमत्ताग्रासमभरंतोश
नातिग्रश्वायेवदत्तेयासंभवतिनंस्त्वहिनवग्रवतिष्ठतेभस्म असैअग्नयेनतुहुंयनः भस्मोद्दयनम
पिपष्टिनं अतएवमपिव्याख्यायते रायस्पोषेण दक्षिणालक्षणेनसमिषामदंतइत्यादिसमानं। ना
भापृथिव्याः नाभौपृथिव्याः पृथिव्यापषानाभिः पृथिव्यैयत्रैषएतत्समिध्यतेसमिद्धाथानेसंदी
प्यमानेआहवनीयाख्येअग्नौ रायस्पोषायधनस्यपोषाय बृहतेमहते हवामहे आकामहे
अग्नेर्यात्रयिष्टाग्नीदेवतातदभिप्रायमेतत् कथंभूतमग्निमित्यतआह इरंमदं इरयान्नेनमा
द्यति त्वमति बृहदुक्थं महदुक्थं यजत्रम् जेतारं पृतनासु संग्रामेषु सासहिम् सोढारं अभि
भवितारं समिधाग्नेग्राग्नाविति आहवनीय विषयो ग्निशब्दः जेतारमग्निमित्यपिशात्रुग्निविष
यः [illegible] याः सेनाः अनुष्टुभः प्रागेनपतीयायाः सात्व उपतिष्ठातत्वहृती याः सेनाः अभीत्वरीः
इणगताविन्यस्मात् इणस्वजिसर्त्तिभ्यक्करपप्रत्ययः इणः अभियायिन्यः आव्याधिनीः आ
विध्यंति याः उगणाः उत्पशाखोऽप्यर्थे अपिच उपूर्णगणाः पृषोदरादिपाठात्सय्यमपद
लोपः येचस्तेनाचोराः येचतस्कराः तस्करस्तस्करोतिपश्यापश्यमितिनैरुक्ताः तान्सर्वांस्
तेतव हेअग्ने अपिदधामिप्रक्षिपामिआस्येमुखे भक्षणाय॥ दंष्ट्राभ्यांदशनशीलाभ्यांदं
ष्ट्राभ्याम् रात्रसिकेऽथिउच्यते मलिम्लून मलिम्लुचः गृहामेनतयाम्लोचयंतिजहम्भो

भवंतिजनेषुकदेषुवाघे: जंम्यैस्तस्करानताजंभावर्तिसमासितांजंभ्याः नाभिस्तस्करान्खादअत्र
पिहनुभ्यांहननशीलाभ्यां स्तेनान् हेभगवः हेभगवन् महदैश्वर्ययुक्तान् त्वंखाद यथामृतवा
न्तिनाभवंति॥ येजनेषु येमलिम्लवः जनेषुस्तेवासः स्तेनाएवस्तेनासः आज्ञमरेख्क तस्कराः
वनेवनाश्रिताः येचकक्षेषु नदीपर्वतकक्षेषु अघायवः छेदभिपरेक्षायामितिवक्रमेस्वमितिअ
घशब्दात्कयपकाच्छेदसीस्तुप्रत्ययः अघंपरस्मैइच्छंतीत्यघायवः तानत्वदधामि स्थापयामि
मिजंभयोः भक्षणयो॥ योअस्मभ्यम् योमनुष्यः अस्मभ्यमस्मदर्थं अरातीयान् अरातिरिवा
चरेत् अरातिः शत्रुः यश्चनः अस्मान् द्वेषते द्वेष्टि जनः निंदात्निंदयतियोस्मान् यिषमाच्चद श्रोतेः
मतिअभ्यासलोपः दंभितुमिच्छतियः तान्तवदधामि सर्वमेवच्छत्रुजातंभस्मसात्कुरु भस्म
सेतिशब्दात्करणाधीजनः यथाभक्षमाणमस्मसाशक्कुर्वंति तथाकुर्वित्यर्थः पुरोहि
तस्मादधाति शंसितंमेब्रह्म शातन्नकरणेउपसर्गोव्यत्ययः निशितंतीक्ष्णीकृतंमेमम ब्र
ह्मनिशितेचवीर्यं वीरकर्मबलंनिशितंतत्रेव जिष्णुजयनशीलं यस्याहंभवामिपुरोहितः॥
उदेषाम् क्षत्रियस्यउद्धरित उद्धरितवानसि यषांयोद्धणाम् बाहूउद्धर्षः उद्धरितवान् वर्च्चःअ
पेयाअपिचबलमृद्धिणोमि वानागयामिवब्रलणापुरोहितसंतेन अमित्रान्नयामि उन्नम
यामिवखान्पुत्रपौत्रान् सामिधमादधाति अन्नपतेअन्नस्यअन्नस्यसरसंनः अस्मभ्यंदेहि अन्न

मं॰ब्रा॰
भा॰
१०२

(१०२)

मिवस्य अमीवाव्याधिः नइद्दितस्य शुष्मिणः शुष्मइतिबलनामबलवतः किंच प्रप्रदातारंतारिषः प्र
तिशयार्थः उपसर्गाभ्याम्‌ः महताप्रकर्षेणोन्नस्यदातारंप्रवर्द्धय किंच ॐ ऊर्जमन्न नः धेहि द्विपदेच
तुष्पदे द्विपादश्चतुष्पादश्च ॥ एकादशोध्यायः ॥ आनंदपुरवास्तव्यवज्रटाख्यस्यसूनुना मंत्र।
भाष्यमिदंकृतंभोजेष्टर्द्धीप्रशाम्यति ॥ यजमानः कण्ठेरुक्मंप्रतिमुंचति ॥ दृशानोरुक्मः त्रिष्टुप् आदि
त्याध्यासेनरुक्मस्तुतिः योदृशानः दृश्यमानः प्रत्यक्षमुपलभ्यमानः रुक्मः रोचनः यश्चजनेभ्यः
उर्व्यामहत्यादीप्त्याव्यद्योतत् विद्योततनः यस्यचउर्मर्षंआयुः उर्मिर्षमनववंडितंआयुः जीवनं श्रिये
रुचानः यश्चजनेभ्यः श्रियंदातुंरोचते सोयमग्निरमृतः अमरणधर्माभवत् वयोभिरन्नैः यमसुव
रोडाशप्रभृतिभिः यदेनंद्यौः यदेवेनमग्निं द्यौः अजनयत् जनितवती सुरेताः शोभनरेताः सुरेता
स्त्रैषायस्यापनोः त्रिः रेतः शुक्रः द्वितीयमस्यतत्वकारणमग्नेः द्यावापृथिवीरक्षतिः नक्तोषासा आ
ग्नेयी त्रिष्टुप् नक्तोषासौ उषाशब्देनाहरुच्यते रात्र्यहनी समानसौ एकमनस्कं विरूपेनानारू
पे कृत्वा रात्रिः शुक्लमाह धापयेते सायंप्रातरग्निहोत्रादिभिः कर्मभिः शिशुबालमिवमाता
पितरौ एकंअखिललक्षणं समीचीसमन्वितेसतिहेये इत्यभूतेनताभ्यांरक्षामीतिशेषः निदध्याति
देवाअग्निंधारयंश्चविणोदाः तमहंधारयामीतिशेषः ॥ शिक्यपाशंप्रतिमुंचते विश्वारूपा
णि जगती सावित्री सर्वाणिरूपाणिप्रतिमुंचते प्रतिदीप्यते इष्टेथ्यप्रहतयशार्वरंतमः प्रकाशाय

तीमर्थः कविः क्रांतदर्शनः यस्य भासा वीत् प्रसौतिभद्रं मंदनीयम् द्विपदे चतुष्पदे द्विपाच्च चतुष्पा
च्च विनाकमरुचत् सविता वरेण्यः यस्य रुचत् विराजयति प्रकाशयति नाकं द्युलोकं सविता
सर्वस्य प्रसविता वरेण्यः वरणीयः अनु प्रयाणमुषसो विराजति स सविता उषसः प्रयाणं गमन
मनुपश्चात् विराजति दीप्यते उषसः सविता पुरोगामीति सवितृस्तुतिः पञ्चत्यमन्त्रः सवितास
शिवं प्रति मंत्र च[illegible]ति शेषः विक्रमाभिमंत्रयते विष्णुक्रमैरवसाना सपत्नोऽसि सपत्नेनात्वम
सि गरुत्मान् गरणवान् त्रिवृत्स्तोमस्तव शिरः गायत्रं चक्षुः बृहद्रथंतरे साम्नी पक्षौ पंचविंशः स्तो
म आत्मा छंदांसि एकविंशतिरंगानि यजूंषि नाम यदेनमग्निरित्याचक्षते तदस्य यजूंषि
नाम साम ते तनूः वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः अग्रयः शफाः खुराः यतस्त्वं सु
पर्णोऽसि गरुत्मान् अतो ब्रवीमि त्वां दिवं गच्छ स्वर्लोकं पत विष्णुक्रमान्क्रमते विष्णोः क्रमोऽसि वि
ष्णोर्यत्तस्माग्रथ्यक्रमोऽसि सपत्नहा च शत्रुघातकश्च अतो गायत्रं छंद आरोह पृथिवीमनुविक्र
मस्व अभिमातिशब्दे केन विष्णुरपि विशेषेण शत्रुरेवोच्यते अस्वयं मन्त्र अरातीयतो हंता अरातिरिवा
चरति अरातीयति अरातिः शत्रुः तस्य अरातीयतः शत्रूयतो हंता अथ [illegible]तेन मा[illegible]नम् उर्ध्व
बाहुः दक्षिणं गृहीत्वा पाणिम् अक्रंददग्निः त्रिष्टुप् अस्या मस्तिविषः अग्निपर्जन्यो कस्यते क्रुंदते नावि
स्फूर्जते अग्निः स्तनयन्निव द्यौः शोहनात्पर्जन्य उच्यते यथा स्तनयन् पर्जन्यः शब्दं करोति प

मं॰ ७॰
भा॰
१०३

103

वमग्निः पर्जन्यवत्कहं करोति अथास्यान्यानि पर्जन्यानि रूपाणि अग्नेः प्रदर्श्यन्ते ज्मामारोरवीति दीरुथः
समंजन ज्मामशब्देन पृथिव्युच्यते द्वितीयार्थे च प्रथमा लिह आस्वादने यथा पर्जन्यः उदभावमपा
गच्छन्नसौ पृथिवीं लिहन्नास्वादयति ओषधीः समंजन व्याप्नुवन् एवमयमग्निः पृथिवीमत्यथ
मास्वादयति स्वकीयज्वालासमूहेन ओषधीः समंजन व्याप्नुवन् अन्नदएवुच्यते सद्योजज्ञानो विहि
मिद्धो अख्यत् यथा पर्जन्यः सद्य एवाभ्ररूपेण जायमानो अख्यत् विरूपसर्गः ख्यातिर्नामसेवध्यते
अनेनैव विख्यापयति किं इद्धो भाराशनसमहसैः द्विस्यादस्यगोप्य वमयमग्निः सद्य एव जायमानः इद्धः
सन् इदं सर्वं विख्यापयति अन्यच्च आरोदसी भानुना भात्यन्तः यथा पर्जन्यः भानुना विद्युद्रूपेण रो
दसी द्यावापृथिव्योरन्तर्व्यवस्थितः एवं अयमग्निः आभाति भानुना द्यावापृथिव्योः अन्तर्व्यवस्थित एव
मग्निः पर्जन्यवत्कल्प्यते अर्चिषणाश्च व हरति पंच आग्नेय्यः पराः अग्ने अभ्यावर्तिन् ऊर्ध्वहृहती हे अग्ने
अभ्यावर्तिन् नशील अभितिवर्त्तस्वमागच्छति आयुषा वर्चसा अन्नेन प्रजया धनेन सत्यालाभेन मेध
या च. रय्या वर्चोरूपेण पोषेण धनागमेन अग्ने महाहृहती हे अग्ने अंगिरः अंगानां रसभूत शतं
ते वसंत आवृतः आवर्त्तनानि सहस्रं वकृतिरूपावर्त्तनानि सन्तु अथाभ्यासमान्यसौ अथैवं
अयाभ्य यः करोमि नावर्त्तमानाः पोषस्य पोषेण अनवाप्तस्य धनागमेन सह पुनः पुनः अ
स्माकं नष्टमाहृत्य आगमय रयिं धन पुनरागमय करोमि गार्तिकर्मा पुनरूर्जा गायथ्या पुनः

१०३

पुनरभ्यासोऽनवच्छेदनार्थः पुनरपि ऊर्जा दध्याद्युपसेचनेन सह निवर्तस्व पुनस्त्वं हे अग्ने इषा अ
न्नेन सह आयुषा किंच पुनरेव नः अस्मान् पाहि रक्ष अंहसः पापान्मकाशात् अथापूर्वं र
हिताः सह रय्या सह धनेन निवर्तस्व किंच हे अग्ने पिन्वस्व अत्र पिन्वतिः सेचनार्थः त्वं च र
यिं पिन्वस्व किंच वसोर्धारया अनवच्छिन्नधनदानेन मनिवर्तस्व किंच पुनः पुनराप्यायस्वेत्य
भिप्रायः कथंभूतया धारया विश्वप्स्न्या विश्वतस्परि सर्वतोधिगतेरर्थे: पूर्यमाणया धारया
उपरिनाभिधारयन्नभिमन्त्रयेत आ त्वाहार्ष किंच त्वा अयनः द्युलोकात् आहर्षं त्वं च अन्तरभूः
अन्तः नाभ्या उपरि शरीरमध्ये अभूः अतो ब्रवीमि ध्रुवस्तिष्ठ अविचाचलिः अविचलन
शीलः विशस्त्वा त्वाम् सर्वाः वाञ्छन्तु अन्नेन वा उपतिष्ठन्तु सर्वं मा त्वधनो राष्ट्रं जनपदसमूहः अ
धिभ्रशत् अपि पध्रश्यत् ।। पाशान् विमुञ्चति नु उत्तमं वारुणी त्रिष्टुप् उदुत्तमं यमस्य पसर्गः
मध्यमेति संबध्यते हे वरुण उत्तमं पाशं उच्छ्रथाय अपशैथिल्ये श्लथीकृत्वा अस्माद् उद्वय अ
स्मत् अस्मत्तः अवाधमं अधमं च पाशं अवाचीनं अवश्रथय विमध्यमं मध्यमं स्थानस्थितं मे व विश्र
थय अथैवं कृते सति वयं हे आदित्य अदितेः पुत्र तेन व्रतकर्मणि वर्तमानाः अनागसः अन
पराधाः अदितये अदीनतायै स्याम भवेम प्रागदक्षिणं गृह्णाति अग्ने बृहन् त्रिष्टुप् आदि
त्यात्मनः अग्नेः स्तुतिः यः अग्रे उषसां बृहन् महान् प्रभाव ऊर्ध्वं अधस्तात् स्थितः यं च निर्जगा

अन्नस्य शिष्यमं हासे मर्वेजि नोपनोय यवि

न्वान् तमसः निर्गतः रात्रिलक्षणात्तमसः अहर्लक्षणेन ज्योतिषा सह अगात् सोऽग्निर्भानुना रु
शतारोचिष्णुना स्वंगः आजातो विश्वा सद्म शोभनांगः सद्मान्यप्राः प्रा पूरणे आपूरितवान् जातः स
जातरश्मिः विश्वा सद्मानि इमे वै लोका विश्वा सद्मानीति श्रुतिः सर्वाणि सदनानि इति प्रत्यक्षकृति
ना ॥ अवहरति हंसः शुचिषदिति जगती यजुरन्ता बृहदिति यजुः जगत्या जगती इमा लोकानिति
श्रुतिः तथा बृहदिति निदधातीति राजसूयेऽतिच्छंदसमित्यके व्याख्यातो मंत्रार्थः उपतिष्ठते
सीदत्वमिति तिसृभिराग्नेयीभिः एका त्रिष्टुप् हे अग्ने शुभ्रो सीद त्वं अवस्थानं कुरु त्वम् अस्याः उखा
या मातुः उपस्थे उत्संगे विश्वानि अग्ने वयुनानि विद्वान् प्रज्ञानानि प्रजानन् पदार्थस्य तत्त्ववेदी
सन् किंच उखाया अवस्थानं कुर्वन्ः मा एनां तपसा मा अर्चिषा अभिशोचीः अभिसंतापय एनामुखां
तपसा तापेन मा च अर्चिषा ज्वालया किंच अंतरस्या मध्ये अस्यामुखायाम् अवस्थितः शुक्रज्योतिः शु
क्लं कर्मसाधनं ज्योतिर्विभाहि विविधं दीप्यस्व अंतरेव्यवहितपदस्यायोयं संबंधः ॥ हे अग्ने
अस्याः उखायाः त्वम् अंतर्मध्यगतः रुचा दीप्त्या सहितः सदने स्वे स्वकीये स्थाने वर्तसे तस्याः एव उखा
याः त्वं हरसा ज्योतिषा तपन् जातंजातं विन्दतीति जातवेदाः तत्संबोधनं हे जातवेदः जातप्र
ज्ञान शिवो भव शिवो भूत्वा शिवः शान्तो भूत्वा मह्यं हे अग्ने अथो अपि च सीद उपविश उखा
याः शिवः त्वं शिवाः कृत्वा दिशः सर्वाः स्वं योनिं स्थानं इह आसदः आसीद वात्सप्रेणोपतिष्ठते

दिवस्प द्वादशाग्नेय्य त्रिष्टुभः दिवः परिदिवः सकाशात् प्रथमं जज्ञे जातः अग्निः प्राणो वै दिवः
प्राणाद्वा एष प्रथममजायतेति श्रुतिः तं जातमभिप्राणिति प्राणो वा अग्निर्जातमेवैनं तत्सन्तं
जनयतीत्येतदभिप्रायं परि जातवेदाः अस्मत् अस्मत्तः पुरुषविधानात् द्वितीयं जातवेदाः
जातपदेन ततो द्वितीयं पुरुषविधो जनयदिति श्रुतिः समुखाद्वा योनेर्हस्ताभ्यां चाग्निमसृ
जतेत्यस्य पुरुषविधस्तृतीयमप्सु तृतीयं तमप्सु अवस्थितं जनयति यदेनमदः तृतीयमप्स्वा
धिजनयदिति श्रुतिः अथ योगर्भोन्तराशीत्सोग्निः उत्समनेन तु उक्तमभिप्रायं नृमणा अजस्रं
नृणां मनो यस्मिन् नृमणाः प्रजापतिः अजस्रमनुपदीप्तं प्रजापतिर्वै नृमणा अग्निरजस्र इ
ति श्रुतिः तृतीयमनु अवस्थितं जनयतीति नृमणा अहरहः अजायताग्निमितिवा कार्य
यद्वैवं वक्ष्यजस्राग्निः तं इन्धानः अदीपयन् जरमानः एवमग्निं जरते जनयतीति यातोरथान्तरेः
हृत्रिः स्वाधीः शोभनाध्या हितो याधीर्बुद्धिर्यस्य सः स्वाधीः ॥ विद्मा ते त्रिधः विजानीमः ते तव
हे अग्ने त्रेधा त्रयाणि त्रिधा प्रविभक्तानि अग्निवायुसूर्याख्यानि त्रीणि रूपाणि विद्मा ते धाम विजा
नीमः तव धामस्थानानि त्रयाणि भवन्ति स्थानानि नामानि जन्मानि वा जन्मान्यत्राभिप्रेतानि
आहवनीयगार्हपत्यदक्षिणाग्निः अतिप्रणीतधिष्ण्यप्रभृतीनि विभक्तानि विहृतानि पुरुत्रा बहु
रूपाणि विजानीमस्ते तव नाम परमं यत् गुहा यत् गुहायां बुद्धौ याभिवास्थितम् यदिष्टमिति वा।

सं·भा
१०५

105

अस्यतन्नामविश्रातमृतं उत्संगे विज्ञानीमस्त्वत्रयमं स्यानंयतत्त्वमानरोंय आगतवान
सिसमुद्रत्वादेयग्रेसमुद्रेत्वावर्त्तमानेन्त्रमणा: प्रजापतिः इयेतीपयाचकारसो
मोऽसृजतेनपक्रमतस्मादेतत्प्रजापतिसत्वमग्निरित्याचक्षतेइत्येमदाभिप्राय अपश्वत्रई
वदत्ताइये अपश्वतवर्त्तमानेभवतेद्दताप्रजापतिरेवइयेआदीपितवान तदयुतत्वोदसृत्म
पृष्ठतपर्न्नेचेदितिश्रुति: वुद्धादितादिवोअग्रऊर्ध्वन्पुलोकस्यऊपस्तिमद्दोदकेप्रदेशो
आदीपितवान् तदश्वतत्वोदासृत्मपृष्ठकपर्न्नेचेतिश्रुति: वुद्धादितादिवोअग्रऊर्ध्वनपुलोक
स्यऊपस्तिमिद्दोदकेप्रदेशेआदित्यात्मनातत्ववदत्तापवर्इये हतीयेत्वारजस्तितस्थिवांसतत्तीय
चतोयुलोके आदित्यात्मनाचस्थितवंतमपामुपस्थे उत्संगेनाभ्यानामपामथ्येव्यवस्थितं म
हिषा: महांत: प्राणा अवर्द्धनवर्द्धयांचक्रु: प्राणावैमहिषाइत्यादिश्रुति: अक्रंददग्निरि
तिव्याख्यातं ॥ श्रीणामुदार: श्रीणां लक्ष्मीणां उदारोमंत्र्यदातानाचवरुणोरयीणांयोधार
यितायनानामनीषाणांप्रार्पण: कश्चिद्दलंवानपिभवतितन्नदातानामयंतमनसाद्दक्षिता
नांअभिलषितानांकोशानांप्रार्पयिता सोमगोपा: धिष्ण्यानामग्न्य: सोमगोपयंतितदभिप्रा
यमेतत् सोमिनोवागोपायति वसु:वासयिता यज्ञोत्रवसत्यनेसएवाग्निर्ध्यध्यानात्यनाति
उपकारंकुर्वंतिशायनासनगवादीनिएवमयमपिउपकरोतिभूतानांतापपाकप्रकाशैरतो।

वसुः सूनुः सहसो बलस्य पुत्रः मथ्यमानो जायते तस्मादेवमुच्यते अपां राजा प्रश्नवस्यैनो वरु
णात्मना राजानं यो जोषाकम् तमसे वरुणो जायसे यदित्ति विभातस्य उषसः आदित्यात्मना इं
धानः इन्धीदीप्तो दीप्यमानः यद्वा उषः काले अग्नीनां प्रादुष्करणे क्रियमाणत ॥ विश्वस्य के
तुस्त्वतस्थः पादो यः प्रथमो व्यास्मायत यस्य इयोमात जनायदग्निमयजंतपंच यदिमा विभ
क्तिको निर्देशः यमग्निं पंचजनाश्चत्वारो वर्णा निषादपंचमाः पंचजना उच्यन्ते अयजंत उष
र्वतः स विश्वस्य प्राणिजातस्य केतुः प्रज्ञानं आत्मना भुवनस्य गर्भः भूतजातस्य वा वहास
नागर्भः संदृप्राणभावेन भूतानामंतः संचरति आरोदसी आपृणा जायमानः स एव पूर
यति द्यावापृथिव्यौ यजमान आदित्यात्मना स एव च मध्यस्थानमहृत्य इंद्रात्मना वीडुं चि
त् दृढमपि अद्रिं प्रदारयितं मेघं सोयं अभिनत् विदारयति परायन् पारुत परेतो गच्छ
न् ॥ उशिक्पावकः वशकानो अस्य कृतसम्प्रसारणस्यैतद्रूपम् य उशिक्कान्तः मेधावी वा
पावकः पावयिता अरतिः अल्पमतिः पर्याप्तमतिः सुमेधाः कल्याणप्रज्ञः साधुप्रज्ञो वा
मर्त्येषु मरणधर्मेषु मनुष्येषु ॥ अग्निः कथंभूतः अमृतः अमरणधर्मा निधायि निहितः
देवैर्योस्य लोकस्य धारकः स उदियर्ति उद्गमयति धूमं अरुषं आरोचनं भरिभ्रत् धारयन्नि
दं जगत् इनो वा अयमर्द रेतः सिंचति धूमेन हि वृष्टिर्भवति नीसेन कृष्णमभिप्राये मंत्रः स्तुकेण

मं॰ त्र॰ भा॰ १०६

108

शोचिष्का यां प्रलोकं उव्वतन् व्याप्नुवन् नदच्यग्रहतारकासंबंधिना शोचिषा ध्वमसदीयतीति
संवध्यते इतः प्रधानाद्धि देवानुपजीवंतीत्येतद्धु मभिप्रायोयं मंत्रः ॥ इषानो हव्य इति व्याप्त
यत्ने प्रययः तेनैव प्रयप्रतिपदिकमेवत करोति हे भगवन्महः शोचे भन्दनीय दीप्त प्र
ष्वंपभूरोऽअशो हे देव हतेवंत हे अग्ने सप्याज्जसोपसा खौर्ष्वि[illegible]विषावदायाथोपविष्टादाष
स्याभिधारयति यतद्धु मभिप्रायम् प्रतन्न्यतनयसीति प्रोमेच्छाद सोलोट्प्रणयासितय
जमानेप्रतरवश्यतिनरोवस्या अन्यच्छ प्रच्छाभेराम्प्रितिशाक पूर्णः वसीय स्थानमभिव ।
स्तत्तरस्यानः मभिवसतिवासेतनन्हृनच्छदसातिईयसन् नतिहेमेयः क्षितिहनोलोपः
वसायइतिसिद्धति प्रशोकमहिमंतत्स्मिन्वसात शाप्सृती : समाइति प्रकृष्टेलोकं
नमान्नुयात् वसीयो लोकः प्राभिमुग्रेदेवभक्तं प्रभिनयमिचसरवम् देवभक्तं
देवसेवितम् ह्वियतिहप्रवतमा[illegible] प्रथवाभिप्रायित्रिमनतम् प्रातुभज नदस्यानेयदी
हुत्रिः लोटः स्थाने लट् : प्रर्थसंबंधात् हे अग्ने आभजसि प्रासेवसे यय जमानं सोऽग्रवेस
भुसापुत्रवणीयेषु किंच उवयप्राभजतेषवयतक्रतषु उक्थ्यउकेथ्यगमस्यमानेप्राभजसि प्रा
सेवसे यजमाने प्रियः सर्व्यस्यभवान् प्रियस्याग्रेर्भवति किंच उज्ञातेनमभिनदत ॥ उद्भिन
त्तियमोर्च्यकामान जातेनोरसप्रचसयातेन उज्ञानिते : उद्भिनत्तिजनितेः जनिष्यमाणेः पुत्र

१०६

पौत्रसंघैः वेदार्थंप्रजाप्यस्वर्गयायिनीभवतीत्यभिप्रायः त्वामग्नेहेअग्नेत्वांयजमानाःअनुष्यन्
अन्वहंस्त्राहन्यहनि विश्वानिवसूनिदधिरेधारयंतिभूमिगोहिरण्यादीनि वीर्याणिवरणीयानि
किंच त्वयावसहविर्णयज्ञफलंवांछमानाःअजेनानेनस्तुकृतिनव्रजोदेवयानमार्गः गोमन्त
गावोरश्मयआदित्यसंबंधिनस्तेषुगोव्रजेउशिजःमेधाविनःअनेनकर्मसमुच्चयकारिणःविव
त्रुविभिद्रुःआदित्यमंडलस्यमध्येशोभनंमार्गंकृतवंतइत्यर्थः तदुक्तंतेयपवमेनविद्वांसिन्व
पंकमाद्देवलोकादादित्यमिति ॥ अस्ताव्यग्निः अस्माभिस्तुतोग्निर्वैश्वानरः नराशंसःशिवःम
नुष्याणांशोभनेस्तवयितारिविभिः त्रिविभिर्यजमानैःसोमस्यगोपायिता अद्वेषपादौलिंगो
क्तदेवतो यतोग्निःस्तनःअतअद्वेषेद्वेषरहितेद्यावापृथिवीद्रवेमआह्वयामस्तदाह्वयक
मंप्राप्यसर्वेहेदेवाःइषमन्नंपिपृतपरयंतयजमानेआसिद्भ्यासमभं सवीरंशोभनपुत्रंविन्नरहः आग्नेय्यःप
चकंडिकाः ॥ समिधाग्निम् आप्यायंतम् उपकृतिं उद्गतीं अनुष्टुप्॥ हेअग्नेउग्रमंत्रेउग्रंत्वां
विश्वेदेवाःविविभिःयःअग्निर्हीधयतेसत्वंविश्वैर्देवैरुद्धियमाणःनःअस्माकंशिवोभवाशि
वःशांतःसुप्रतीकःशोभनमुखःविभावसुर्विभूतधनश्च यातिअनुष्टुप्आद्यहेअ
ग्नेत्वंज्योतिष्मानभूत्वाअत्वा शिवेभिःरश्मिभिःशिवैःशोभनैःसुखकरैःअर्चिभिःगत्वासत्व
बृहद्भिर्भानुभिःरश्मिभिर्भासन् दीप्यमानःमाहिंसीः तन्वाशरीरेणप्रजाः अक्रंददग्निरिति

मे॰ब
भा॰
१०८

107

आत्यान्तं समिदमादधाति अस्मायं विष्णुप्रकर्षेणमहत्तायमग्निः भवतस्यप्रजापतेः अस्तुएवंशृ
णोति प्रतिवचनं कथमेतदध्यवसीयते यथाप्रजापतेः शृणोति वचनमितिविषमस्थैर्या
नतोचतेहरश्मा: यस्मात्समिदाधानसमनन्तरमेवविरोचतेस्वैर्ध्यानसूर्यइवहरश्मः महादी
भिः यस्यप्रमितस्याग्नेःकृष्णस्यरदाहसंहननात्सग्रामेषुपतनयातमिथाअप्यायितः यस्मा
द्दीप्यदीप्यते देवाः देवसेवधी प्रतिस्थियमोजननानाशिवः शान्तनः अस्माकंभवेति
तस्मात्प्रजापतेर्वचनंशृणोति आपोदेवीः दशकेडिकाः अस्माभ्यवहरणाय आपोदेवीः
प्रहेवस्माविष्टप्र हेआपः देवप्रतिगृह्णीतप्रतिगृहीतन अस्मायतनं स्वागताद्भिरत्रा
येपिह्यहविर्हारः स्वागतादिभिः परिगृह्यस्योनेहागणेधससरभाउलोकेस्योनेसुखावहेहक्
एधिस्यापयतउकारः समुच्चारणार्थः सुरभौ शोभनगन्धयुक्तेपशुप्रकारैः लोकेस्यो
नेशण्यायांतस्मिन्नमेताम् तदस्यानेपतदःप्रयोगः प्रकृतत्वाद्दस्मैभस्मरूपायाअग्रयेन
मेताजनयः जायाः उपतिष्ठन्त सपत्नीः शोभनयत्नः रूपलावण्ययौवनालंकारैर्वेदग्धसं
पन्नाः पृथ्यंचमानेवक्त्रविभ्रम धारयनयानभोजनवासोभिर्गोपायत ततश्च अपक्रामत
निपतन्तभस्म ॥ अश्वग्रीवायत्नेननमंत्रेणभस्मातिष्ठितेनावस्थाप्याथेदासीगायत्र्यनु
ष्टुभ्याग्रेयः सर्वगतत्वप्रकाशयन भस्माभ्यवहरणमेवअपक्रान्तेअस्माद्हेअग्रेसधिः समानं

१०८

स्थानं सधिः तव सौषधीरनुरुध्यसे सत्वं बीजमवस्थाय ओषधीः अनुरुध्यसे ओषधीविपरि।
णाममनुविपरिणमसे ततो गर्भे सन्विद्यमानः जायसे पुनरपि किंच गर्भः असि भवसि ओषधी
नां गर्भस्त्ववनस्पतीनां गर्भश्च विश्वस्य भूतस्य भूतयामस्य हे अग्ने गर्भो अपामसि ॥ अपस्वाग्ने प्र
सद्य च तस्रभिराग्नेयीभिः हे अनुष्टुभो हे गायत्र्यो प्रसद्य अवक्षाप्य भस्मना भस्मरूपेण योनिं
स्थानं अपश्च पृथिवीं च हे अग्ने संसृज्य संगत्य च मातृभिः अद्भिः त्वं ज्योतिष्मान् भूत्वा पुनरस्या
मुत्वायामासदः आसीदः पुनरासद्य पुनरासदनं स्थाय सदनं स्थानं अपश्च पृथिवीं च हे अग्ने
ततोऽनन्तरं शेषे शीङ् स्वप्ने स्वमश्मसेयन स्वपिषि मातुर्यथा उपस्थे उत्संगे अंतर्मध्ये अस्याम्भुवा
यां शिवतमः पुनरूर्जा निवर्त्त्योत आस्यास्त्वाया मृपति हे वो धाम रन्ति द्वाभ्यां त्रिष्टुप् गायत्री
भ्यां गायत्री यजन्तां विश्वकर्मणे स्वाहेति यजुः बोधा मे बुध्यस्व मम अस्य वचसः किमभिप्रायो
मे यदहं ब्रवीमि हे यविष्ठ युवतम अतिशयेन युवा युवतम मंहिष्ठस्य अतिशयेन प्रभृतस्य प्रभावप
र्याप्तिनः साहे स्वधावः अन्नवन् किंच पीयति त्वः पीयतिराक्रोशकर्मा आक्रोशति त्वः एकः
पुरुषः त्वां हे अग्ने अनु त्वो गृणाति त्वः एक पुरुषः एष लोके स्वभावः कश्चिदाक्रोशति कश्चि
त्स्तौति यं वच सति वन्दारुः वंदनशीलः सन् तेन तव तन्वं शरीरं वंदे सर्वोपि यस्त्वत्स्तावेः पति
तः स यथा वाच वनवांश्च सर्वोपि बुध्यस्व अवगच्छ हे वनस्पते धनपते वनदावन् धनसादानः

ध्रुवां त्वं ध्रुवायां पृथिव्यां कुरु अस्मास्वस्त्वन्नः देवेभ्यस्त्वदो भागधानि स्वप्रीतः सन्नस्मिन्यज्ञे पदस्मार्जं
गृह्णाति विश्वकर्मणे स्वाहा आदधाति समिधं पुनस्त्वाग्ने येयीति त्रिष्टुप् निर्वाणं त्वां पुनः समि
धं ता आदीपयन्त आदित्याः रुद्राः वसवः पुनश्च ब्रह्माणो ब्राह्मणाः ऋत्विग्यजमानाः हे
वसुनीथ नीयमानस्तुतिरुच्यते वसुलाभनिमित्ताय स्तुतिः सवसुनीथः यज्ञो यागो हूयते
न च त्वं तनुं शरीरं वर्द्धय सत्याः सत्याश्च सन्तु यजमानस्य कामाः ये भस्माभ्यवहरणाव
वच्छिन्नाः ॥ पलाशशाखया गार्हपत्यं व्यूहति अपेतविवित्रिष्टुप् अर्द्धर्चेनोदरसर्पिणा उद्ध
तेपादेन यमः पादेन पितरः इमं लोकमपवीनअपगच्छत विचसर्प्यातातः विसर्प्यतच अ
तः स्यानात् ये अत्रस्थ ये एव अत्रस्थ भवथ पुराणाः चिरंतनाः इदानींतनाः कस्माद्वयमप
सर्प्याम इति चन्मतिः अदात् दत्तवान् यमः अवसानं स्थानं अवसं अस्मिन्निति अवसानं पृथि
व्याः अस्मै यजमानाय अक्रन् कृतवन्तश्च पितरः इमं लोकं स्थानं अस्मै यजमानायाप्रतो प
गच्छनेति उखानि वपति उल्वं संस्त्रवः पशुसंस्त्रवश्च तेषां मन्त्रस्तथैव व्याख्यायते संज्ञान
मसि त्रीणि यच्छेषं समिधः एकाभावमावषेयत एकं ज्ञानमसि उल्वमस्तवान् तस्माद्यज
मानोल्वसमेव वाजायत इति श्रुतिः कामधरणं कामानधारयति संपादयति पशवो वा उ।
रवाः पशवः कामधारणमिति श्रुतिः अनेनाग्निना एतस्य कामधारणं भूयात् कामधारणं

भूयास्त इति निवक्ष्य वचनान्तं मयि ते पशवो भूयास्त इति श्रुतिः उखाभिप्रायमेकवचनं सिकता
निवपति अग्नेर्भस्मभवसि भस्मभस्मेति नदीभ्यो भस्मिन्नेभस्म भस्मस्ताहरणात्सिकता नाम से
भूज्ञा नवाग्निः स्वं भस्मानि दहतीति श्रुतिः अग्नेः पुरीषमसि अग्नेश्च पुरीषं पुराण
मसि भस्माभिप्रायमेकवचनं अग्ने रेतः हैरण्यानरसः रेतो यत्सिकता इति श्रुतिः परिश्रितः
परिश्रयति चितस्य चित्र चयने अस्मत्किंपिवक्ष्य वचनात्तेयाय सं चितो भव यथा परिसमन्ताच्चि
तस्यतावच्चयने ऊर्ध्वं चितो भूत्वा अग्निमाश्रयध्वं गार्हपत्यमिष्टकाभिश्चीयते अयं सो अग्निः
षड्वेमा ये यत्रेष्टभं वचनद्वीषष्ठ्येन्द्र त्रिष्टुभो इष्टकोपधाने ऊर्ध्वं तामभिनयेत्तद्दर्शयति अयं सः
गार्हपत्यो अग्निः श्रीयते यस्मिन् स्थिते अभिषुतं सोमं इन्द्रो दधे धारयति जठरे उदरे वावशानः का
मयमानः कथंभूतं सोमं दधे सहस्रियं सहस्राहं वाजमन्नं भूतं सर्वस्य जगतः अत्यन्तमपि
न कारसं प्रतार्थो नेतरं भक्षणादेवमदकरम् सप्तिं शरणात्सिकरं न केवलमस्मिन्स्थिते
इन्द्रः सोमं जठरे धारयति किं तर्हि त्वमपि ससवान् संस्तूयसे जातवेदः ससवान् हवींषि
संभजमानः संस्तूयसे ऋत्विग्यजमानैः हे जातवेदः अयं तावदस्माकं यस्य प्रकरणार्थः अ
ग्निस्त्वाद्यति परिणाममभिप्रायेणाचष्टे अयं वै लोको गार्हपत्यो अग्निः अस्मिन् लोके अ
भिस्त्वन्तः रक्षो परिणामभूतमप इन्द्रः जठरे मधे मध्यस्थापयति सहस्रियं वाजमत्यं न स

मं॰ञ॰ भा॰ २१५

109

त्रिभिर्मन्त्रैर्ये सहस्त्रियो वाजः अग्नेर्विशेषणानि समस्तानि संस्त्यये जातवेद इति व्याचष्टे वित्तः
सम्स्त्रायसे जातवेद इति गार्हपत्यरूपेणाविमस्तनवीयते आहवनीयरूपेण वार्थानरहृतित्व ॥
अग्नय ते हृत्य ग्रेयत्ते न वपुर्लोके दिवि आदित्यलक्षणं वर्चः यच्च पृथिव्यामग्निलक्षणं वर्चः य
च्चौषधीषु यत्तद्व्यवस्थितं यच्च अप्सु यत्तद्व्यवस्थितं आयष्टव्य मर्यादया षष्ठ्यर्थे पत्नायपत्ताउ
रूतानि वर्चांसि तवल्पीयांसि येनत्तवर्चसा अन्तरिक्षमुरुवीस्तीर्णं आनन्तेष्या आतनोषि
त्वेषः सभानुः महतस्वर्चः अर्णवः अर्णस्वान् उदकवान् अथवा अरणवान् वायुः स त्वे
ष इति श्रुतिः नृचक्षाः नृणां मनुष्याणां कर्मेश्वरेति स्यानोऽग्निः स्तनः अग्ने दिवः ।
लोकस्य मेध्ये अर्णो उदकं अच्छाजिगासि अच्छ अभेराप्तुमिति शाकपूणिः अभिजिगासि
आपो वा अमुष्मिन् दिवोऽर्णस्तापयष भूमो नाकेनीति श्रुतिः अच्छा देवान् अभिजिगासि च दे
वान् कृतमात् देवानित्यनन्याह ऊचिषे धिष्ण्याये उच्यन्ते इति लकार रकार कत्व रूष वचनानां
व्यत्ययः ये धिष्ण्यास्य प्राणयः किंच याः रोचने लोके स्थितस्य सूर्यस्य ॥ पुरीष्यासः वक्त
वचनं द्रष्टकायेत्तत्तेषु पुरीष्यापर्तुः याः पशुभ्यो हिताः अग्नय इष्टकाः प्रावणेभिः पुरू
ऊः गतौ प्रवणेण गमनेन लोकव्याप्तिभिः सजोषसः समानप्रीतयः समानसेवना वा स
मानं हिते लोके सेवते अद्रुहः अद्रुहितास्त्र नमः ते जुषंतां सेवंतां यज्ञं यज्ञ अद्रुहः अद्रि

नारः अनमीवाश्च अनशनायाश्च बुभुक्षादिविकाराः इषमन्नमक्षितिः महीर्महतीः अभ्र
नाः पशुमेडदयाति इडामग्र इडामन्नम् हे अग्ने शुक्रदंसं वक्रकर्मसाधनभूतम् यत्रस्क
मोऽङ्कपशवो वा इट्टेति नद्वलीवर्दं तुष्याय तदस्मैनेन हेतुनाम सलिंगोः गोसनिं धियं नीसनिं दा
नेपयोरथिहृनादिके शाश्वतमं शाश्वतिकतमम् अनपायिनीं हवमानाय सहि देवानाकयति
माथप्रसाधयमतङ्क भवति अन्वमोपमेवने शाश्वतिकेन संयजमानाय देहि किंच स्यान्नः
स्तुतस्तनयः भवेद्वास्माकं पुत्रपौत्ररसः विज्ञावा प्रजातिमान् प्रजावान्वा यद्वा विजयशीलः
पितरं वा योजयति वीर्याणा पयास्तमस्याव मेनत्करोषि साहे अग्ने तेतव भूतम्भयात् याश्च
सेश्वस्मात्र द्वितीयामनुपदधाति अयं तेव्याख्याने पुरस्ताडुपदधाति चिदसि चित्रचयतेर्वि
नासिसादयति तयादेवतया साद्दिनासतनीयं गिरस्वत् प्राणवत् यथाहि प्राणः सर्वम
गव्याप्यावस्थितः एवं त्वमसि ध्रुवसीदति विशस्वदेवतं पतिवाग्ये सादेवतां गिरस्वत्
प्राणो वाऽङ्गिरा इति श्रुतिः द्वितीयामनुपदधाति परिचिदसि परिसर्वतश्चितासि तयादे
वतये तिव्याख्याने लोकं पृणमनुपदधाति लोकं पृण अनुष्टुप्याज्या लोकंस्थानं छिद्रं पूर
यच्छिद्रं च पूरय अग्नेस्वयमेवपूर्णा भव अथो अपि च सीदति विशेव ध्रुवा त्वमसिति स्थला सि
इन्द्राग्निचत्वा बृहस्पतिश्चास्मिन्योनौ स्यानेऽसीषदन् यासादयत् तिहि मा तु घा धृष्णु त्वा

सादयितुं समर्थ इत्यभिप्रायः रुद्रदोहसाधिवदतीतिनाग्रस्य अनुष्टुप्यत्वात्ऋतिपरिणामभूता
आप उच्यन्ते यद्यपिहिवपदस्याप्योमंत्रः एतत्परिणामभूतादिवः इत्येतेनपदेनइहसंबध्यते दिवःपु
लोकान्तरच्युताः रुद्रदोहस्यः आपोवैरुद्रदोहस्तदोह इतिश्रुतिः अन्नसंहिताप्रापः आप्ये
नस्यपदस्यविशेष इत्यनेनसंबंधः यज्ञोवैरुद्रदोनन्तविशेष इतिश्रुतिः अस्ययज्ञस्यसंबंधिनं
सोमंश्रीणोतीतिमिश्रयतीत्यभिप्रायः अन्नंवैश्रीरिति एतदुक्तंभवति अस्मिंल्लोकेपतिता
अपि ओषधिपर्नस्यान्नभूताः सोमस्योपकुर्वन्तिकस्मिन्कालेश्रीणन्तिजन्मदेवानांसं
वत्सरोवैदेवानांजन्मेतिश्रुतिः संवत्सरेसोमयागस्तदभिप्रायमेतत् त्रिष्ठारोचनेम
वनानिवैत्रीणिरोचनानीतिश्रुतिः त्रिष्ठारोचनेष्वितिवचनेप्राप्तेयस्त्रिष्ठुप्सवचनेछुपवंश्रु
तितोमंत्रोव्याख्यातः ओषधिनिवपति इंद्रविश्वाःऐंद्रीत्रिष्टुप्इंद्रंविश्वाःऐंद्रीत्रिष्टुप्इंद्रं
विश्वाःसर्वागिरःस्तुतयःऋग्यजुःसामलक्षणाःअवीवृधन् वर्धयन्तिसमुद्रव्यचसं
समुद्रमिववाचःसंमानागतिंअदेवाभवलेवरथीनंरथीनां सर्वेषांरथीनामधिरथ
सुस्तवधितिर्णायंतथा [illegible] वाजानांसत्पतिंपतिंवाजानामन्नानांपतिंसतांचपतिम् श्रु
तिस्मृतिविहितकर्मानुष्ठातारःसन्तउक्ताः चित्रयग्रावूर्वोनिवपति समितमितिचतसृभिः
उस्निगपतिष्ठाहहस्त्यासिक्तपंक्तिभिःअग्निदेवत्याभिस्तृतीया उखाग्निदेवत्यासमितहित्ती

६६६

यथा द्रष्टव्यमिति व्याख्यायते योयुवां संप्रियो संगतिप्रियो रोचिष्णू रोचनशीलौ सुमनस्यमानौ परस्प
रं शोभनचित्तं वन्नौ इषमन्नं ऊर्जं उपसेचनं सर्पिरादि अभिसंवसानौ अभ्यवहरन्तौ वसेरथंतिरे
हृति: एतत्कर्म कुर्वाणौ समितं इणगतौ संगतिकृतत्वम् संकल्पयाम एकसंकल्पौ च भ
वत्वमिमेतद्दशास्महे ॥ सवां आसमकरम् आभिमुख्येन स्थितौ संस्कृतवान् अहं वाम्
युवयोर्मनांसि बुद्ध्यहंकाररमनांसीति बहुवचनसंबन्धात् व्रतमिति कर्मनाम संस्कृतवान् वा
युवयोः कर्माणि समु चित्तानि चित्तशब्देन संस्कारा मनोगता उच्यन्ते संस्कृतवानस्मि तन्म
नोगतान् संस्कारान् उकार: समुच्चयार्थीय: एवं मन: कर्मसंस्कारैरेकीकृतैरेकीभूतं
कदेवताभिमानीनं प्रार्थये हे अग्ने पुरीष्य: पशव्य अधिपा भव अधिपतिर्भवतं तत: असमभ्य
इषं चोर्जं च यजमानाय धेहि देहि इषमन्नम् ऊर्जं तदुपसेचनं दध्यादि अन्वेतदह अग्ने पुरीष्य:
पशव्य: रयिमान् धनवान् पुष्टिमांश्च आसियत: अतः शिवा: कृता दिश: सर्वा अभ्ययातिं
द्द्रह आसद इति व्याख्यातम् उखां शिक्यादिमुञ्चति मातेव पुत्रं पृथिवी पुरीष्यम् उखा स्तुति: ये यम
खा माता इव पुत्रं वी पृथिवी रूपमवस्थाय मन्मयी भूत्वा पुरीष्यं पशव्यमग्निं स्वे योनौ स्व
कीये कृत्वो त्संगे अभा: प्रथमपुरुषस्येतत् रूपं उखा शब्द सामानाधिकरण्येन आभारुखा
धारिभवतीतामिदानीं कृतमन्त्रा समुन्नतौ विमञ्चेद्वेवै: ऋतुभि: संविदान: अहो महत्कर्म

६६६
श्री

सं·भा·
१११

कृत[illegible]मित्येवंसंवादंकुर्वन् प्रजापतिर्विश्वकर्मा च विमुंचतु अस्मिन्नास्त् नैर्ऋतीनामित्येका
नामुपधानं तिसृभिर्मन्त्रैः ।। अस्मत्वं तं सोममभिषवमकुर्वाणं मां यजमानं वा त्वं येर्ष्यन्त
कर्मभिः इच्छन्तं प्रतिगच्छ किंच स्तेनस्येत्यामनु इहितेनस्ववोचस्य इमां गतिमनुकुर्व
न् इद्विष्वपलायमानादितस्करस्यतदेवयज्ञ्येषकर्मकरोति नान्यत्तान्स्करः समूनस्कर
इत्यते भुवनमाह अन्यमस्मादिच्छ अन्य ९ ष अस्मत् इच्छन्तं नृशंतं तां तनबकुला
गतिमिव दंउगर्भंउत्काष्येदानीं सामन्त्राश्वाह नमोदेविनिर्ऋते तुभ्यमस्तु ते तुभ्यं नमोस्तु
नमः स्त्रनेन नमस्कारः शोभनः ते तव हे निर्ऋते अस्तानि ऋतिः कृतुस्पतिः अवमपत्रा भूमि
र्वा हे निर्ऋते तुभ्यं नमोस्तु किलदत्तीतिव्रमसेनाः तिग्मं उत्ताहवन्नेजा यस्याः सा तिग्मते
जाः तस्याः संबोधनं हे तिग्मतेजः अयमयं विवृतआयोमयं वंधं विछिंधि च तत्पतं ये नाद्व
वद्धं जस्य जीवभावलक्षणेन जनितात्म्रियते मृत्वा जायत इति किंच यमेनाग्निना त्वं यमया
च एषिध्या संविदाना एकमती भूय उत्तमे नाके उत्कृष्टे स्वर्गे अधिरोहय एनं यज
मानं ।। यस्यास्ते यस्यास्ते तव हे घोरे विषमशीले आसन् आस्ये मुखे जुहोमि हविः एषां
वधानामवसर्जनाय विमोकाय ।। मातं एतान्वधान्ममो विसृज किंच यां त्वां जनो लोकः
भूमिरिति कृत्वा प्रमदं ते स्तौति तां त्वामहमपि स्तौमि तथैव वा प्रतिष्ठाभूतानां जननयित्री मातेव

विभर्त्ती आदिभिर्गुणैः किंच निरृतिं त्वां अहं परिवेद परिजानामि विश्वतः सर्वतः निरंतरादिविदि
ता आमं विवानहि नास्ती त्यत एवं वंधानवस्त्वात्सत्रः शिक्यरुक्मपाशं इयं संदीपः परेण स्थिति
यैनेवीविष्टप् यजमान उच्यते यत्ते तव देवी निर्ऋतिः आबबंध बद्धवती शिक्यपाशं रुक्मपाश
च ग्रीवासु कंठे अविचृत्यं हंती छेदने अविच्छेद्यं अनवखंडनीयम् अनेनैव यजुषा तं पाशं
ते तव विष्यामि स्यति रूपस्य विमोचने विमुंचामि आयुषो न मध्यात् अग्निर्वा आयुस्त
स्यैतन्मध्यं यच्चितो गार्हपत्यो भवत्यचितश्च आहवनीयः नकारः सर्वत्रस्थैअग्रेर्मध्यात्
अथोक्त्रूपाशः सन् अग्निरूपमवस्थाय यजमानपते पित्तं अत्र अद्धि भक्षय प्रसूतः अ
भ्यनुज्ञातो नि मर त्वाउदपांते निनपति अंतराम्मे इष्टकमुपोतिष्ठति नमो भूत्यै विराडेकपदा भू
तिदेवत्या नमो भूत्यै श्रियै या इदं अग्नेलक्षणं कर्मचकार कृतवती शालाद्वार्योपस्यात
निवेशनः संगमनः त्रिष्टुप् पृथिवीलोक संस्तुतो यमग्निः यो सममग्निः निवेशनः अग्नि
लक्षणं कर्म वकप् निविशते अस्मिन्निति निवेशनः संगच्छतेऽस्मिन्निति संगमनः केषां
वसूनां धनानां विश्वा रूपा सर्वाणि रूपाणि आहवनीयदक्षिणाग्निप्रणीताग्नि धिष्ण्य
प्रभृतीनि अभिचष्टे अभिपश्यति शचीभिः कर्मभिः स्वे स्वे धिष्ण्यानि कल्पयति देव इव
सविता सत्यधर्मा अविसंपक कर्म कारी यस्य इंद्रो न इंद्र इव तस्थौ स्थितवान् समरे संग्रामे

सहतंवयंस्तुमः

मं॰ ३॰ भा॰ ११२

112

पथीनां परिपंथिभिः सह तेव यंस्तुम इति वाक्यशेषः ॥ सीरं युज्यमानमभिमंत्रयते गा
यत्री त्रिष्टुप् भ सीरा युंजंति सीराणि युंजंति कवयो मेधाविनः युगा वितन्वते युगानि वितन्वंति
पृथक् नानाकं पृथक्ताः कवयः युंजंति धीराः धीमंतः अग्निदेवविदः किमर्थं युंजंति देवेषु सुम्न
या सुम्नमिति सुखनाम द्वितीयार्थे तृतीया देवेषु सुम्नं सुखं कर्त्तुमिति शेषः सीरकवि
शह्वयोर्वरुवचनं प्रश्नार्थं युगानि तु वक्तृन्यापियन्ते भवति युनक्त सीरा सीराणि युनक्ति
वितनुध्वं ती विस्तारयध्वं युगानि सोम्यायोक्तृप्रभृतिभिस्ततः कृते योनौ वाहनादिभिः व
पत इह देवे वीजं व्रीह्यादि गिरा वाचा च याओषधीरित्यादिकया च श्रुष्टिः समेसेन च वपत न
प्याचपतयथ्या श्रुष्टिः अन्नजातिः व्रीह्यादिकाः सभराः सहभरस्य फलस्य तेन वर्त्तते इति
सभराः अपरे स्त्रीलिंगमाहुः आमितफलेत्यर्थः असद्भवतु नः अस्माकं यथा नेदीयः अ
तिकतमं इत्थं हीनर्थकः । सृण्यं दात्रं पक्कमौषधं आइयात् आगच्छेत् एतदुक्तं भवति
अतिवचनता दोषधीनां निकटतमं दात्रं भूमेन्य पक्कमौषधमागच्छेत् यथा तथा वपतेति
वमुन्त्रः सीताः कृषंति च तस्मिः ऋग्भिः तत्र देवत्यभौ तृतीयापंक्तिः चतुर्थ्यनुष्टुप् ।
शुनं सुफाला शुनमिति सुखनाम शुनं सुखेन सुफालाः शोभनफलालांगलाया स्थि
ताः निकृषंतु विवर्धं कृषंतु विलिखंतु भूमिं कीनाशाः हलिनः अभियंतु अभिगच्छे

काव्यपः २

युं३

न्वादेवैरनुद्भिः सहिताः अस्मै एवं स्वहृष्टे देवे शुनासीराविति वायुः शुनेतं तरिदेसीर आदित्यः प्राव
णात् वाष्पादिसोहविषा उदकेन तोषमाना स्तोषातिर्वथकर्मा घ्नंतो सिंचतो भूमिं सुपिप्पलं हि
फलमथ शोभनफलयुक्ता ओषधीः कर्तेनकृमत द्वयोर्वक्तवचनं छांदसम् अस्मे अस्माकं
घृतेन सीता मधुना सीता समज्यतां अनुमता परोदाभिधापीति त्रीणि पदानि सीते आभ्या
वर्तस्वेति प्रत्यदाभिधायिनी द्वे पदे एकस्मिन्मंत्रवाक्ये नत्रविरोधि समवायेन भूयसा स्या
त्सधर्मता प्रतिन्यायात् प्रथमं चानियतकारणस्याव्यतिक्रमादिति चन्यायात् तस्मादु
पक्रमप्रभृति व्याख्यायते घृतेनोदकेन सीता मधुनोदकेन समज्यतां संसिच्यतां विश्वैः सर्वै
देवैरनुमता अभ्यनुज्ञाता मरुद्भिः स्वमरुतो ह वै वर्षस्येशते घृतेनोदकेन सिक्ता अनुज्ञाता च मा
रुद्वादिभिः ऊर्जस्वती अन्नवती पयसा पयोदधिघृतादिभिः पिन्वमाना सिंचयंती सर्वा दिशः
अस्मात्सीते सीता इति विभक्तिव्यत्ययः पयोवत्वात् अस्मान् प्रति सीता अभ्यावर्तस्व त्वं आभ्या
वर्तितामिति पुरुषव्यत्ययः ॥ लांगलं पवीरवत् पवीतिधारोच्यते सोऽस्यास्तीति पवीरं फालः
तद्वत् मतुबर्थे नदस्य लांगलस्य पवीरमस्तीति पवीरवत् लांगलं फालसंयुक्तमित्यर्थः अतिल
क्षणया व्याचष्टे लांगलं पवीरवत् लांगलं रयिमत् सुशेवमिति सुखनाम शोभनं सु
खकरं सोमपित्सरु सोमं पिबतीति सोमपाः यजमानः तस्मिन्सोमपि यजमाने शरणशीलं ।

मं॰त्र॰
भा॰
११३
113

भूमेः खननशीलं तत्सहहन्यते यदा सोममपि यजमानेपायंत्सरति नाशयतीति सोमपित्व
रूपहा सोमः पीयते येन चमसेन स सोमपिः तस्य सोमपेः सहहन्तं लांगलं नहि लांगलं कर्म
न रेण सोमाः सुर्यादि स्यंभूतं लांगलं तदद्धपति उन्नमयति गामविं प्रफर्व्यं च पीवरीं फर्वतिगीति
कर्म्मप्रकर्षेणफर्व्वीगमना प्रफर्व्या प्रथमसुवतिः पीवरी उत्सनस्तनकपोला तामुद्धपति प्रेः
[illegible]वरथवाहणम् प्रस्थानयुक्तमुत्कृष्टजवोपेतं रथवाहं नामसुख उद्धपतीत्यनुवर्तते
कामकामदुघे सीतोच्यते हे कामदुघे कामं नामकारणी कामंधुद्व प्रदरयकेषामित्यत आह
मित्राय वरुणाय चेंद्राय च अश्विभ्यां पूष्णे प्रजाभ्य ओषधीभ्यः चकारः समुच्चयार्थः सर्व
त्रानुषज्यते ॥ अनडुहो विमुंचति विमुच्याधं गायत्री एवं जगतः स्थितिनिमित्तभूता हविषम
भिनिर्वर्त्य कृतकृत्याः संतो विमुच्यध्वं युगात् हे अघ्न्याः अहंतव्याः देवयाना देवकर्मका
रिणः यद्वा देवयानमार्गनिमित्तभूताः अगन्मगतवंतः अशनायोद्भवात्तमसः पारमस्य
वद्वकं यो शनाया पिपासे शोकंमोहं जरां मृत्युमत्येतीति तदेव स्पष्टयति ज्योतिः आपाम प्राप
वंतः परमात्मलक्षणम् यद्वालक्षणं वा देवलक्षणं वा कुशासं वेजहोति सन्नस्वद्धः य
ज्ञेनेन सत्रूः समानजोषणाः आहुः संवत्सरः सहित्यपोदद्दाति अयवोभिः यवाश्वप्र
वाश्वार्दमासामासाश्वोच्यते सजूः उषाः अरुणीभिः अरुणवर्णीभिर्गोभिः सजोषसौ अश्वि

काक्ष्मिनिः

नोदक्षोभिः सजूः स्वरः पतयोनअग्नेयेनसजूः वैश्वानरः इउयाग्राक्रत्याग्राग्नेयी पृथिवी इउापृथिवी
स्थानास्त्रियास्तस्याग्रनग्रहणं पुंकनपतरंगौवीगतंवाइउापाहेनोच्यते हुतेनहविषास्वाहास
कृतमस्तु ॥ दश सर्वौषधं षट्पतिसप्तविंशतिरनुष्टुभः ओषधिस्तुतिः पंचदशउपवनेतिउक्ताः
याओषधीः याओषधयः पूर्वाः प्रथमाजाताः अन्याभ्यओषधीभ्यः भविष्यकालसंवपिनीभ्यः
देवेभ्यः ऋतुभ्यः ऋतवोवैदेवाइतिश्रुतिः ऋतुभ्योऽर्थाय ऋतवओषधिसंवद्धाकतंत्र्याइति
त्रियुगंत्रीणियुगानिसमाहृतानित्रियुगंत्रिकालमित्यर्थः वसन्तेप्रावृषिशरदिपुराश्वैव
वसन्तादिषुपूर्वस्मिन्नहि संवत्सरउत्पन्नाओषधयोऽग्निदेवेभ्यपंते किंतिमिन्नमित्यतआ
ह मन्यैनुमन्येजानेतासांबभ्रूणांबभ्रुवर्णानां बभ्रुः सोमः अहं अतधामानि धामशब्दः स्था
नपर्यायिः संवत्सरोपलक्षितमेकैकं स्थानम् यदिदशतायुः शतार्द्धः शतवीर्यः पुरु
षः एतानि शतंधामानि सप्तचयएवेमेसप्तशीर्षण्याप्राणास्तानितदाह ॥ शतंहे ओषधयः शा
तव: युष्माकं अंव मातरः धामानि जन्मानि सहस्रमनवोरुहः अपिच सहस्रं युष्माकं
विरोहणानि संति अधाशतक्रत्वः अथैवंसति हे शतक्रत्वो वहुकर्माणः इमंमे प्रजा
पतिरयं मायजमानं मे मम संबंधिनं अगदो व्याधिः अगदमव्याधिं कृतउकुरुत ॥ ओषधीः प्र
तिहे ओषधयः प्रतिमोदध्वं हृष्यत पुष्पवतीः प्रसूवरीः पुष्पावत्यः प्रसवचपत्रसत्यः ततो

मं·भा
११४

नेतारं अश्वा इव संग्रामम्। सजित्वरीः सहजयनशीलाः अभ्यावीरुधश्च विविधं आर्धिं रुन्धन्तीति
वीरुधः। पारयिष्णवः पारस्य विशीलाः भवत अस्माकम् इति शेषः। ओषधीरिति हे ओषधयः यत्
एतं यक्ष्मं प्रशमनेदानवाप्यपगमादित्यमित्यपंक्तौ अशमानरोगसंविग्ना मीढ्वः न दोद्देवीः वः शुष्मा
न् हे देव्यः। उपसंगम्य उपब्रवे ब्रवीमि प्रार्थयामि सनेयं संभजेय अश्वं गाम् वासः आत्मानं च
सनेयं तव यज्ञपुरुष। प्रजापतिर्ऋषिः॥ अश्वत्थे वः चतुर्थः पादः प्रथमं व्याख्यायते
यस्मात् अवथ पुरुषम् यदा असौ सनवथ संसेवध्वं पुरुषं यजमानं अथ अश्वत्थे वः शुष्मा
के निषदनं अवस्थानं अश्वत्थस्य उपरि भवतीनाम् अवस्थानं भवतीनां पर्णे वः पलाशे वः
पर्णमध्ये वः वसतिः स्थितिः होमार्थं धृणा कृता अश्वत्थस्य पर्णे यो लाद्दि
नलोपः छान्दसः। अथाधिना हि तेन क्षत्र भवत्रि गामा भवंति गोभाज इति किलासथ इत्थं श
वः पाठ इत्येणः किल ति विद्याप्रकर्षेतनोऽग्रे ग्रोज्ञता सत्यः यो भाजः गाशब्देना वादित्योऽभि
धीयते आदित्यभाजः पूर्वं किल भवथ न तु किं अग्रे ग्रामान्यापति सम्यगादित्यमुपतिष्ठते
आदित्यात् जायते वृष्टिः वृष्टेरन्नं ततः प्रजा इति॥ यद्वा अश्वत्थे वो निषदनं अश्वत्थे निषद
नं अश्वत्थस्य फलिने सर्वौषधयः फलवत्यो भवंति पर्णे च फलिने कोऽश्वाः दयः फलि
ता भवत्रि गोभाजः पृथिवीभाजश्च उक्ताः सत्यः किल अश्वसनथ भवथ न तु क्षम यदाऽपु

११८

रूपं तं सेवध्वं भोजनादिभिरुपकारैः एवं त्वरवयार्थगतयोरयमभिप्रायः ॥ यत्रौषधीः
यत्र यस्मिन्पुरुषे भैषज्यकर्मार्थं हे ओषधयो यूयं समगमत समगच्छत व्याधिं जेतुं कथमिव रा
जानः समिताविव यथा राजानः समिताविव यथा राजानः समितौ संग्रामे शत्रुं जेतुं समाग
च्छंति किं तत्रेत्यत आह विप्रः ब्राह्मणः स उच्यते भिषग्वैद्यः रक्षोहा च अमीवचातनः अमी
वा व्याधिः चातयति नाशयति नाशनः ॥ अश्वावतीं सोमावतीमोषधीरिति बहुवचनेनापदे
शादिहापि बहुवचनं भवति या ओषधयः अश्ववत्यः अश्वसंपादिन्यः सोमवत्यः सोमसं
पादिन्यः सोमयागसंपादिन्यः ऊर्जयंत्यः ऊर्जं बलं प्रगुणतयोः बलसंपादिन्यः उदोजसः उ
द्गतं ओजो यासां ता उदोजसः ताः सर्वाः ओषधीः अहं अवित्सि वेद्मि ज्ञातवानस्मि विदित्वा च
अस्मै अरिष्टतातिं अरिष्टतातिं विनाशार्था न रिष्टमरिष्टं तस्मै अरिष्टनाशाय भैषज्यं करो
मीति शेषः उच्छुष्माः उच्छुष्मः ईरते इत्यनेन संबध्यते उदीरते उद्गच्छंति प्रकाशी भवंति
शुष्माः वीर्याणि ओषधीनां संबंधीनीति कथमिव गावः गोष्ठादिवेरते गावः गोष्ठा
द्धिरिव क्रांताः किं कुर्वंती नांथेतु नांथतं सनिष्यतीनां संभजमानानां यजमानानां तन
वं पत्नेरुषा ॥ इष्कृतिर्नाम उपसर्गैकदेशलोपः कादसः निष्क्रमणं विनाशनं व्याधा
देः करोतीति निष्कृतिस्तावदस्मदीयायाः मातर्नाम अस्मिन्नभिप्राये अप्यथामपि वर

यक्ष्मस्य भवथ निष्कृतीः व्याधिनिष्क्रमण्यः किंच सीराः सहस्ररया अनेीवननीरहनिसीराः पत
त्रिणीः पतनशीलाः स्थन भवथ कृत्स्नं नेमं नर्थकाउपजना भवेति हस्तिन कारउपजनः क
स्मिन्काले एवं यक्ष्मस्य भूता भवथेत्यत आह यदामयति आमरोगे यदामयाविनि स्थिते
तस्य व्याधिनिष्कृत्यतिनाशयथ अतिविश्वाः यदा अत्यक्रमुः आक्रमततेनुः विश्वाः
अनीत्न वृन्ने तेभ्रृ भ्रि विश्वाः सर्वाः परिष्ठाः परि सर्वतो व्याधीनिविष्ठाय तिष्ठतो निपरि
ष्ठा ओषधयः कथमिव स्तेन इव व्रजं पश्या स्तेन तस्करः व्रजमक्रामपक्रामत् परिमुमो
षिषया एवमभ्यक्रमुः अथानन्तरमेव ओषधयः प्राचुच्यवुः प्राच्यावयन् यत्किंचित
न्वः शरीरस्य रपः रपो रिप्रमिति पापनामसु भवति पापजनितं व्याधिमित्यर्थः ॥
यदिमाः यदेव इमाः वाजयन्नहमोषधीः हस्त आदधे स्थापयामि अनन्तरमेव आ
त्मा यक्ष्मस्य व्याधेः नश्यति कथमिव पुरा जीवगृभो यथा जीवन्तेव हिंसार्थयोर्गृह्य
ते मृत्युर्वीः गोवा मनुष्यादिः स जीवगृभः तस्य जीवगृभः प्राग्वधाद्धतिविषादान्न
नेहमिति मन्यमानस्य यथात्मा न रूपेदेवं व्याधयात्मा नश्यति यदाह ओषधीर्हस्त
आदधेति संबंधः यस्यौषधीः यस्य रोगिणः हे ओषधयः प्रसर्पथ अंगमंगं परुष्परु
रुः सर्वाण्यंगानि सर्वाणि सक्ते भवति परुः शब्दः पर्ववचनः तस्य रोगिणः ततो य

११५

ष्मं विबाधमानस्तस्मात् अंगादंगं सम्...दायात् व्याध्युपशमं कुर्वन् कथमिव उग्रो मध्य
मशीरिव उग्रः स्वविषयो वृद्धो गोधांगुलित्राणः स एव विशिष्यते मध्यं मध्यमभागस्थिरणा
शीतिर्मध्यस्थः शत्रून् बाधते एवं यूयमपि रोगिणो रोगान् विबाधध्वं स्वपमास्य: यद्वा उग्रो
रुद्रः स एव त्रिशूलं मध्यमे वा त्रिरणो शीतिर्मध्यमश्रीः स यथा युगान्ते सर्वं जगत् भ
स्मसात्करोति एवं यूयमपि व्याधिकृतम् साकं यक्ष्म साकं सहेत्यर्थः हे यक्ष्मन् सह
प्रपत स्पवाषेण रोगेण पक्षिणा किकिदीविना शब्दानुकरणमेतत् किंकिं एवं या
दीव्यति स सह प्रपत सहितं व सास्य उचितः साकं वातस्य ध्राज्या ध्राज्या प्रपत साकं नश्य प्रपतस्यादि
निहाकाः निर्दयेन कृच्छ्रापत्तिः तया कृच्छ्रापत्त्या सह नश्य यद्वा शब्दानुकरणमेतत् हाकेति
हते हं कया ओषध्या वयं रूपया शब्दानुकरणभूतया सह नश्य हे यक्ष्मन् पुनरागमनाय ।
अन्या वः हे ओषधयः अन्या ओषधिः वः युष्माकं अन्या ओषधिं अवतु पालयतु अन्या तु ओष
धिः अन्यस्या ओषध्याः प्रभावस्य प्रभावं उपावत इति बहुवचनमन्वयः उपावत उपगम्य पा
लयत ताः यूयमेव सर्वाः संविदानाः संगच्छमानाः इदं मे मम प्रावत पालयत वचः वचन
मोर्घ ॥ याः फलिनीः या ओषधयः फलवत्यः याश्च अफलाः फलरहिताः याश्च अपुष्पाः पुष्प

११५
पु.३०

रहिता: याश्च ओषधिनी: फलवत्य: बृहस्पतिप्रसूता: अनुज्ञाता: ता: न: अस्मान् मुंचंतु अंहस:
पापात् इत उत्तरमनारभ्यवादा मंत्रा: तेषां लिंगतो विनियोग: मुंचंतु मा मां शपथ्यात् शा
पथ्यनिमित्तात् किल्बिषात् मुंचंतु अथो अपि च वरुण्यात् वरुणनिबंधनात् उत अथो अ
पि च यमस्य संबंधिन: पड्वीशात् बंधनात् पड्वीशशब्दो ह्यत्र बंधवचन: संदानमर्वंतं प
ड्वीशमिति हि श्रूयते किंच सर्वस्मात् देवकिल्बिषात् मुंचंतु यत्किंचिदिह निमित्तं पापकर्तृ:
इदं द्वं हविरित्यवसाना आशीर्यजमानाशी: इदं पयोलक्षणं हवि: प्रजननं उत्पादकं मेम

ममास्तु दशवीरं माणावेदप्रावीराः सर्वगणं अंगानि वै सर्वे गणाः स्तनये अविनाशाय पुनर

पिहविर्विशेष्यते आत्मानं यद्हविः स्तेनोति संभजते तदात्मसमिपंवं प्रजासंतनिपश्च सनिलो

कस्तविअभयमपुनराहृतिः अग्निः प्रजावकृल्लाअतिमहृदाममकरोतु एयं चेदं स्मति

जः अत्रचपयश्रोरत अग्रसमात्सथत्र ॥ उदीरितां त्रयोदशपितृः विहृभोजगोमकादृशीय

जमानवाचने उदीरतां ईरगतो उद उपसर्गो मरः ऊहुकमंतोउर्ह्वंगच्छंतु अवरे स्मिं लोके

वस्थिताः पितरउत्साम्यसः परामवपराम्यः ये पितरः परस्मिं लोके वस्थिताः ते पितरः उदी

रतां तस्मात् दपि स्थानाद्विशिष्टतरं स्थानं गच्छंतु उत्मध्यमाः मध्ये भवा मध्यमाः ये पि मध्य

माः तेपि विशिष्टानं स्थानं उत्गच्छंतु पितरः सोम्यासः सोमसंपादिनः असंयेईश्च येपिअ

सुमाणा अविवृः वातात्मानः अवृकाः अवृकिणः माध्यस्थ्यसमास्थिताः ऋतज्ञाः सत्यज्ञा या

यज्ञाचारस्वाध्यायनिष्ठा वा तेपि तेतो विशिष्टतरं स्थानमुत्गच्छंतु एवं च स्वकीयेन कर्मणा

अस्मदीयेन वयांउत्कृतिम्रामाः तेनः अस्मान् अवंतु पालयंतु पितरः हवेषु आह्वानेषु ५ अ

गिरसोनः अंगिरा ऋषिः तस्य अपत्यानि वर्हति अंगिरसः नः अस्माकं पितरः । नवग्वाः

नवगतयः पुनः पुनः अपुनरावृत्या गम्या गच्छंति नवनीयास्तेन व्यावागति येषां ते नणामाः

पेवथर्वाणः अथर्वणेविहृ सापत्यानि अथर्वाः पुनरथर्वाणेति स्वरतिकर्मा तत्प्रतिषेधः

मं·३·
भा·
८८

127

ये च भृगवः भृगोर्बहून्यपत्यानि सोम्यासः सोमसंपादिनः तेषां पितृणां वयं सुमनो क
ल्याणमनसः स्याम यज्ञियानां यज्ञसंपादिनां अपि च भद्रे भंदनीये सौमनसे कल्याणे मनसि
स्याम भवेम ॥ येनः पूर्वे येनः अस्माकं पूर्वे पितरः सोमसंपादिनः अनूहिरे वहन्ति प्राप
णे देवाननुप्रापितवन्तः सोमपीथं सोमपानं वसिष्ठाः वसिष्ठस्य बहून्यपत्यानि वसिष्ठा।उ
नैवसिष्ठतमः कृतास्पदो वसतिनिति भिः तैर्वसिष्ठैः समः सह रराणः संप्रीयमाणः हवींषि
कामं भूतो यमः उशन् वश कान्तौ अस्य कृतं संप्रसारणं स्येन रूप कामयमानः कथं भू
तैर्वसिष्ठैः उशद्भिः कथं मनुप्रतिकामं यथाकामं भक्षयतु ॥ त्वं सोम हे सोम प्रचिकि
तः नः चिकित्वाश्चेतनावान् प्रकर्षेण चेतनावान् विशिष्टचेतनस्य भक्तो त्वं मनीषा मनसः
इच्छा विशिष्टतरा भवति यज्वनां यद्वा त्वं हे सोम प्रचिकितः किं तज्ज्ञाने प्रकर्षेण ज्ञातासि
यावत् तावत् त्वं मनीषा मनीषया प्रज्ञया त्वं च रजिष्ठं ऋजुतमं देवयानां त्वं पथा नेषि प्र
णगमयसि पथ्यां पथ्यानं किं च तव प्रणीति प्रणयनेन तव वा अनुज्ञानेन पितरः नः अस्माकं
हे इंदो कर्म कृत्वा देवेषु मध्ये रत्नं रमणीयं यज्ञफलं अभजन्त भक्तवन्तः धीराः धीमंतः
त्वया हि नः यस्मात् त्वया आश्रयभूतेन नो अस्माकं पितरः हे सोम पूर्वे पूर्वजाः कर्माणि च
क्रुः कृतवन्तः हे पवमान धीरा धीमंतः अतः आप्य येन त्वां संभजमानः तानि तानि कर्माणि

अस्मदीयानि श्रवातः वातागुपद्रवरहितः एकचित्तः परिधीन् सर्वतो निहितान्यज्ञोपद्रवका
रिणः अघोर्देऊणोम् आच्छादने अपगमय वीरेभिः वीरैः स्वाभ्येभ्य सहितः सद्यगायनवा
नुभवानः अस्माकं योयस्य ददाति सतस्य धनवानिति मातिः ॥ त्वं सोम यत्वं हे सोम
पितृभिः संविदानः संवादं कुर्वाणः अनु द्यावापृथिवी आततंथ अनुविस्तारे अन्वाततंथावि
धावापृथिव्यौ दृढीकरोषि द्यावापृथिव्यौ तस्मै तव हे इन्दो हविषा विधेम हविर्दद्मः इतिवा
वार्थः वयं च हविः प्रदातारः भवेम पतयो धनानां सोमवतां पितृणां षष्ठं च म् ॥ व
र्हिषदः पितरो अर्वाग् बर्हिषदः बर्हिर्यज्ञः याजिनो बर्हिषदः बर्हिषि सीदन्ति बर्हिषदः पितृ
रः ऊती ऊत्यां अर्वाक् अर्वाच आगच्छत कोहेतुः रागमनः इतिचेत् इमा इमानि वः युष्माकं ह
व्या हवींषि चकृम तानि जुषध्वं सेवध्वम् ये अस्माभिः अथ तेनागतिर्हवींषि आसेवि
तानि ते यूयं पुनरपि आहूयमानाः आगतेष्ववसः त्रेनरहविर्भिर्दत्तेन नशंतमेन शमित्रिष्ठ
षानाम ...रवापितृन तमेन हेतुभ्मेन अपपरि निष्ठाः यत्तसमा पुनरकालेनः अस्माकं सौ
योः पदर्थमेननं शमनं च रोगाणां दधात योः भयं च भयानां दधात अस्मदपि यत्किंचि
हरथः अपायंनतदस्माकं दधात आहं अविलिर अभिमुखेन वत्रिविद्मितवान्वा आह
पितृन् सुविदत्रान् सुविदत्रः कल्याणदानः कल्याणदानान् नपातं च विक्रमणं च वि

शं॰शु॰
भा॰
१७८

178

स्यार्विसृतौ यौ मर्त्यं तस्य न विद्यते पान्तो यत्र गन्तारं सन्न पान्तो देवयानः पंथाः विविधं क्रमणं य
त्र गन्तारो स विक्रमणः पितृयाणः पंथास्तत्र हि अरघट्टघटीवत् नराधरं प्राणिनो गच्छंति
देवयानपितृयाणौ यज्ञसंबंधिनावहं वेद्मि तत्र मिनस्त्रा पितॄन्नयतः एवमतो वक्ष्यमिव बर्हि
षदो ये पितरः स्वधयान्नेन सह हवम्सनीयन्तल्लक्षणेन सन्तस्याभिषुतस्य भजंत भजंत सेवते पि
तरः पानं सोमपानं ते इह कर्मणि आगमिष्ठाः आगच्छंत्विति व्याख्यानं संगतिः उपहूताः आ
हूताः पितरः सोम्यासः सोमसंपादिनः बर्हिष्येषु निधिषु प्रियेषु इह विविशेषणान्येतानि
बर्हिषि समेवेषु बर्हिषेषु च बर्हिषि सादितेषु इह हविर्निधिष्ठेषु निधिभूतेषु अभिरुचितेषु तो पितरः
एतेन रक्षताम् आगमन्तु आगच्छन्तु आगम्य च ते इह श्रृण्वन्तु एवं तु अस्मदीयानि वचांसि श्रु
त्वा च अधिब्रुवन्तु यदनुरूपं पितृभिः ब्रुवाणा ते च अवन्तु रक्षन्तु सर्वतः अस्मान् आयन्तु नः चतु
र्थ्याग्निष्वात्ता तेभ्यः आयन्तु आगच्छन्तु नः अस्माकं पितरः सोम्यासः सोमसंपादिनः अग्निष्वात्ता अग्नि
अग्निष्वात्ताः पुनर्योऽग्निमेव सादयति तं हि श्रोतस्मार्तकर्मकारिणः पथिभिर्देवयानैः गैर्देवस
ह गमनैः देवसहयायिनः ते पितरो येषामन्त्यकर्म क्रियते पुत्रपौत्रप्रपौत्रैः उक्तं च पुत्रेण लोका
न्जयति पौत्रेणानन्त्यमश्नुते अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपमिति आगम्य चास्मिन् य
ज्ञे स्वधयान्नेन मदन्तः तृप्यन्तः परितुष्टा अधिब्रुवन्तु ते अवन्तु अस्मानिति व्याख्यानम् अग्निष्वात्ताः

हेअग्निष्वात्ताः पितरः आइहगच्छत आगच्छत इहपश्चसदःसदः गृहंप्रतिसदत उपविश
तहेसुप्रणीतयः साधुप्रणयनाः ततः सुखोपविष्टाः अत्तभक्षयत हवींषिप्रयतानिनियम
गतरागद्वेषमोहैः अभिसंस्कृतानिप्रचीनिवर्हीषि अन्नानिअथअस्मा स्वेनः रयिंधनंस
र्ववीरंदधाततत्कारउपजनः ॥ येअग्निष्वात्ताःयेपितरःअग्निष्वात्ताःअग्निनाअस्वादिताः
येअनग्निष्वात्ताःश्मशानकर्म्मप्राप्ताः मध्येदिवःद्युलोकस्यस्वधयास्वकर्म्मफलोपभोगे
नमादयन्तेसुखंसेवन्तेतेभ्यः तेषामितिविभक्तिव्यत्ययः स्वराट्स्वयमेवराजतइतिस्वराट्
अकृतकैश्वर्यो भगवान्स्वराट्उच्यते असुनीतिप्राणाप्राणनेताद्वितीयसहायकृता असून्प्राणान्न
यतीतिअसुनीति एतामितिलिंगव्यत्ययः यथावशं यथाकामंयथाहविततन्वंशरीरंकल्प
यातिकल्पयतु ॥ अनग्निष्वात्तान्पितॄन्ऋतुमतःऋतुसंयुक्तान्हवामहेआह्वयामःना
राशंसेसचमसेसोमपीथंसोमपानेयेआसक्ताःप्राभुःनाराशंसे सेवमसेपितॄणांभक्षःअ
यतेअथयदिनाराशंसेसप्तमीइत्यपक्षेपितृभ्योनाराशंसेतेभ्यइतितेच आह्वय
मानाःविप्रासःमेधाविनःसुहवाःस्वाह्वानाभवन्तुएवंकृतेवयंसोमपेनयोरयीणाम्
आचाराजातदशश्लोकोनुवाकोनवर्चिआदशमेद्वौगायत्र्यौद्वितीयात्रयोदशेनवमीचानुष्टुभः
तरापितरउच्यन्तेआचाराजानुसवंजानुपातयित्वादक्षिणेनानिषद्यदक्षिणतःवस्यानंकृ

त्वायंनिर्द्देशः एवंस्वभावाहेतेअग्रेणप्रजापतिंपितरः प्राचीनावीतिनः सव्यंजान्वाच्योपासीदन्नि
तिश्रुतेः इममस्मदीयंयज्ञमभिगृणीतअभिष्टुवतदक्षिणामेवकालकर्त्रेहविर्यजमानोत्व
यैः साधुर्यंयज्ञइतिविश्वेसर्वेसोमवंतः वर्हिषदः अग्निष्वात्ताश्चमावहिंसिष्टमाचहिंसांकु
रुतहेपितरः केनचिदपिनः अस्मान्यत्यद्यपिवः युष्माकंआगः अपराधः आगश्शब्दः
सान्तोनपुंसकलिंगोपराधवचनः पुरुषताविभक्तिलोपः पुरुषत्वेनचलचित्ततयाकराम
कुर्मः ॥ आसीनासोयेयूयंआसीनाः अरुणीनामुपस्थेअरुणावर्णानांअरुणाचर्म॰
हिनरकर्णीभवंति याभिःकुतपाःक्रियंतेकुतपक्रियाश्चपितरः कुतपेचासनेदद्या
दितिश्रुतेः यद्वा अरुणवर्णानांरश्मीनांउपस्थेउत्संगेआसीनाआदित्यलोकजितःपित
रःतेरयिंधनंयच्छतदत्तदाशुषेहवींषिदत्तवतेयजमानायमर्त्यायमनुष्यायपुत्रेभ्यश्चहे
पितरः यजमानार्थंपुत्रवचनंसर्वेहिपितॄणांपुत्राः यजमानाः अयजमानाश्चतस्यव
स्वः प्रयच्छतदत्तयदभिप्रेतंवसुतेचइहअस्मदीयेयज्ञेऊर्जंदधातस्थापयत ॥ यमग्नेक
व्यवाहनत्वंचिन्मदग्निरूच्यतेचतसृभिः ऋग्भिः हेअग्नेकव्यवाहनकव्यंवोढःअग्निस्त्वमर्थि
कारोयस्यसएवंसंबोध्यतेयंरयिंहविर्ल्लक्षणंधनंत्वंचित्त्वमपिमन्यसे अवगच्छसिसाधुश
कंतेननश्रेयः श्राव्यमितितंहविर्लक्षणंरयिंनः अस्माकंगीर्भिःवाग्भिःपुरोनुवाक्यायाज्याव

षट्कारलक्षणेभिः अवाप्य हविर्विशेषणमेतत् अवणीयं देवत्वादेवेभ्यः पत्नयदेहिपत
निहूनकर्मायुजेयथायुजेयथायोगं ॥ योअग्निः यः अग्निः कव्यवाहनकव्यपितृणांह
विरूह्यते नहहनिपितॄन् पत्तनऋतावान् ऋतावृधः सत्यवृधोवायज्ञवृधोवाहितीया
वक्रवचनमेतत्सरदानीमेव हव्यानिवोधांतिप्रब्रवीत् हव्यानिहवींषिदेवेभ्यः आपि
तृभ्यआसमृद्धयाः र्थीयआकारः देवेभ्यश्चपितृभ्यश्चइमानिदेवेभ्यश्चपितृभ्यइति ॥
त्वमग्रय त्वहेअग्रेईडीतः अध्याषितः सनकव्यवाहवहप्रापणेऽग्रसेपतद्रूप ऊढवाना
निहव्यानि हवींषिसुरभिणिसुगंधीनिकृत्वाकृत्वाचहवींषिप्रादाः प्रदत्तवानसिपितृभ्यः
स्वधापितृमंत्रेणनेचपितरः अदन्नश्नंतवतोभक्षितवंतः सः अद्धिभक्षयत्वहेदेवप्रय
ताप्रयतानिमुचीनिहवींषि ॥ येचेहनपितरः येचपितरः इह अस्मिन् समीपेइहवालो
केआसतेयेचनेहयान् चपितॄन् विद्मः अवगच्छामः यानुउइतिपदपूरणः नचप्रविद्मः
नाप्रजानीमः त्वंवेत्थयदितेजातवेदः तेषामाद्रादौक्रियतेहितीयातोवाक्यावलीयत्त्वात्ता
नत्वंवेत्थवेत्सिजानासि यतिश्चविभक्तिकोनिर्देशः यतीन् पृष्टीन्निमनैमित्तिककर्म
करणेनिर्दिष्टकल्पषान् जातवेदः अतएवमस्यतेस्वधाभिः पितृसंबंधैर्हविर्भिः यज्ञंसु
कृतंसाधुकृतं जुषस्वसेवस्व ॥ इदंपितृभ्यः इदमितिप्रयंदत्तोनिर्देशः पितृभ्यः नमः अव

मं॰ ३॰
भा॰
१८॰

१४०

हविर्ब्रह्मदत्तं यत्तत्स्वधयाप्रयत्यानंतरं येपितरः पूर्वासः पूर्वेईयुः स्वर्गंययुः येउपरासः उपरतव्यापा
राः कृतकृत्याः परब्रह्मईयुः याताः येचपार्थिवेरजसि पृथिव्यामभवं पार्थिवंरजः ज्योतिः अग्निःत
त्रानिषत्ताः अभिमुख्येननिषण्णाः अग्निलोकप्राप्ताइत्यर्थः येवायेचनूनंनिश्चयेनसुवृज
नासुसाधुवृत्तासुविक्षुयजमानेषुनिषण्णास्तेभ्यः इदंपितृभ्योनमोऽस्त्वद्येतिसंबंधः अथा
यथा अथइत्यपि यथानोऽस्माकंपितरः परासः पराएवपरासः उत्कृष्टाः ऊर्ध्वलोकगामिनः
प्रत्नासः प्रत्नशब्दः पुराणवचनः चिरंतनाः हेअग्नेऋतंसत्यंआशुषाणाः अनुवाः व्याप्नुव
नः व्याप्तिशब्दविभक्तिकोनिर्देशः शुचीदीप्तंभास्वरंइद्भूयएवार्थे अयन्गताः प्राप्ताः दीधितिंआ
दित्यरश्मिमंतंआदित्यमंडलंयद्वाहिदेवयानः पंथाः उक्थानियेशंसंतियज्ञेषुतेउक्थशासः
पितृणांविशेषणमेतत् एवंवयमपिहेअग्नेत्वत्प्रसादात्तद्दामाभिंदंतः द्वामाष्टविभक्ति
कोनिर्देशः दामंमाहतीभिंदंतः वेदिंचत्वालयूपावटादिखनंतोयद्वापृथिव्याआश्रयाणियेसंवी
हिपशुयूपादीनिभिंदंतः यज्ञसर्वोपकरणमनुतिष्ठंतइत्यर्थः अरुणीः आरोचनाः दीधिनी
रश्मीन्अपवृण्मः अपवृणुमःवरश्मीनेदेवंपंथानं त्वामनुतिष्ठामएवसमस्तार्थः ॥ उशंतस्त्वा
वशकांतौ कृतसंप्रसारणस्यैतद्रूपं हेअग्नेयतोवयंउशंतःकामयमानाः त्वानिधीमहिस्थाप
यामहे यतश्चवयंउशंतःकामयमानाएवसमिधीमहिसंदीपयामः अतस्त्वमपिउशतःकामय

मानपवउशनःकामयमानोनेवग्रावद्दपित्त्नकिमर्थमितिचेत् हविषेअन्तवेद्दविषःअदनाय
अथैद्देमंत्रःसोमोराजेअमस्यत्रिदानभूतःपयसानेन्द्रि अपांफेनेनवलसीयपादप्रभृत्याख्यानम्
यच्छृद्योगात्विश्वाःसर्व्वाःयतयदाअजयःसुधःसंग्रामात् अथनदाअपांफेनेनवृत्रेन
नमुचेरसुरस्यशिरःहेइंद्रत्वंउदवर्त्तयःउद्दर्त्तितयानसिन्नुसुरवैहत्रिःछेदेनेवर्त्मनेइद
नीमेतेचमंत्रंवदमाणाचानुवाकेअक्तिःसंवभांतिनस्यशीर्षोच्छेन्नलोहितमिश्रःसोमा
निघृतस्मात्सात्द्वीभनस्ततनदंयमोविपानमपश्यत्सोमोराजामृतंसुतइतितनेनउंःस्व
दयित्वात्मनदेयति ॥ सोमोराजाश्वेग्रहोपस्थानंअश्विसरस्वतीइंद्राअपश्यन् आयाज्जिसा
मद्दाद्दस्यपतिगवतुस्थितेअतिजगश्योशेषअतिशक्यौयथापकारणानिवक्तुनिवि
विच्यमानानिदृश्यपतेयथाचदृष्युम्भृतानिसंसृष्टानिपुनर्विविच्यमानानिदृश्यतेएवमय
मपिलोहितमिश्रःसोमःसोमएवेत्यनुवाकार्थःसोमाराजामृतःअभिषुतःअमृतंसपयेनर
सीभावानस्थूलस्यहितलक्षणमस्तीभावःऋजीषद्रूपेणावजहात् त्यजतिसत्यंमूर्त्तिलादृश्यो
षभावस्यसत्यमेतत् अनेनचऋतेनसत्येनसत्यमेतत्संजातइंद्रियंवीर्यंविपानंविविक्तंलो
हितात्सोमपानंयोगपवाविपानंशुक्रंरजोरहित अन्धसःअन्नात्सभृतंअपवादइन्द्रस्यइंद्रियं
इदंपयःअमृतंमधुभवत् ॥ अद्भ्यःक्षीरंक्षीरोदकयोःसंसृष्टयोःअद्भ्यःसकाशात्क्षीरंविपु

ण। अपिबत् पीतवान् क्रुङ् हंसः हंसजातिमाश्रित्य आंगिरसः आग्नेः सहि अंगानां रसः धिया
प्रज्ञया ह इत्यभूतात्मास्यप्रज्ञानस्याजात्यामेव स्थितस्य भवति सत्यमेतत् अनेन ऋतेन स
त्येनेंद्रियं विपानं शुक्रं अंधसः सम्भृतं भूयात् अथ इदं इन्द्रस्य इन्द्रियं पयः अमृतं मधु भूयात् ॥ सोमम
द्भ्यः सोमोदकयोः संसृष्टयोः सोमं वियुज्यापिबत् अद्भ्यः सकाशात् छंदसा छंदोनिवद्धेन वे
देन हंसः आदित्यः शुचिषदेत ऋतेनेत्यादि समानं ॥ अन्नात्परिस्रुतः अन्नाद्विल्लेद
णात् इमं परिस्रुतः रसं ब्रह्मणा त्रयीलक्षणेन व्यपिबत् क्षत्रस्य नृपानवशीकरणे पयः सोमं
प्रजापतिः अथ मः शारीरी सत्यमेतदनेन सत्यमित्यादि समानं ॥ रेतो मूत्रं व्यवहितपदप्रायः रेतः विज
हाति त्यजति योनिं स्त्रीप्रजननं प्रविशद् इंद्रियं शिश्नं योनिप्रवेशादनंतरं मूत्रं विजहाति त्यजति तु
ल्यद्वारयोरपि रेतोमूत्रयोः मूत्रस्थानं हित्वा न्वावतिष्ठते रेतः सत्यमेतत् ततः गर्भो जराय
णा आवृतः वेष्टितः जरायुं च उल्बं च जहाति त्यजति जन्मना प्रसवेन सत्यमेतत् नास्याना ।
मेकद्वाराणां प्रथमसमुदाहरणं एकस्यां नामेकद्वाराणां द्वितीयं ऋतेनेति व्याख्यानम् ॥
दृष्ट्वा रूपे दृष्ट्वा उपलभ्य रूपे सत्यानृतयोः इदं सत्यमेव रूपं इदमनृतमेव रूपमिति व्याकरो
त् व्याकरणं पृथक्कृत्वा वस्थापनं कथं व्याकरोत् अश्रद्धामनृतेऽदधात् अनृतनिमित्तत्वा
दश्रद्धायाः अश्रद्धामतेऽदधात् सत्यनिमित्तत्वाच्छ्रद्धायाः श्रद्धाग्रस्तिकोकग्रदधात् ॥ ॥

स्रुतः सोमउच्यते पयश्चस्रुतः परिस्रुत्प्रजापतिः सत्यमेनेन अनेनऋतेनेति व्याख्यानम् दृष्ट्वा
परिस्रुतः रसंशुक्रेणअमलेनमंथेणशुक्रंअमलंविपुज्यअपिवत् पयश्चसोमंचप्रजापतिः
सत्यमेनेन ऋतेनेति व्याख्यानम् ॥ खुरैर्वसाग्रहान्द्वाविंशतेजुहोतिसीसेनेतिसप्तचंषोडशाज
गत्यः यथाइंद्रस्यभैषज्यंक्रियते तथाआभिः उच्यतेयत्तः परेनतूपाते प्रथमायामृचिसीसेन
उर्णासूत्रेणवतंत्रमिवसर्वापरेहद्विणान्त्रैः स्रवयंतियज्ञंकेवयंतिमनीषिणः मेधाविनः
कवयः क्रांतदर्शिनः मनसापर्यालोच्यगुणतउक्तः येदानीनामतआह अश्विनौसविता स
रस्वतीवरुणश्चकिमर्थंइंद्रस्ययज्ञंवयंतिइंद्रस्यरूपंभिषज्यन्त् ॥ तदस्येंद्रस्यरूपममृतंत्रम
णपर्णिशचीभिः कर्मभिः तिस्रोदेवताः संदधुः संरराणाः संरममाणाः अश्विनौसरस्वतीच
कण्ठंसंदधुः लोमानितावच्छष्पैः संदधुर्बहुधानतोक्मभिस्त्वचमस्यनकारः समुच्चयेआपरि
समाप्तेः त्वचमितिविभक्तिव्यत्ययः बहुधावतोक्मभिः त्वगस्येंद्रस्यसंदधुः मांसमभवन्नला
जाः ॥ तदश्विना तत्पेशः रूपंइंद्रस्यअश्विनौभिषजौरुद्रवर्तनीतौइंद्रस्यवर्त्तनिः मार्गाः य
योः तौरुद्रवर्तनीरुद्रवर्तनीवारूपमार्गेणवर्तेतेइतिवासरस्वतीचवयतिवयंतिवहुवचनमे
कवचनस्यसंवधाति पेशोरूपंसामर्थ्यंअंतरंअभ्यंतरंकिंकेनवयंतिअस्थिचमज्जानंचतावन्मास
रैः कारोतरेणचयथाक्रमंवयंतिकिंकुर्वाणाः दधतः स्थापयंतः गवांत्वचिचर्मणिस्तृणा ॥

मं॰ त्र॰
भा॰
१८२

सरस्वती मनसा सरस्वती मनसा पर्यालोच्य पेशलं पेशस्कृतं हिरण्यं नाम नग्नहू पनाम च हिरण्यवद्ब्रा
नूपवद्दा वसु यथ नेनाम सत्याभ्यां सहिता वयति पटमिव सृजन्ति दर्शनं वपुः ॥ दर्शनीयं च वपुः श
रीरं इंद्रस्य रसं परिस्कृता नरो हितं रसं च सरस्वती नासत्याभ्यामश्विभ्यां सहिता वयति वपुषो रंज
नार्थं अश्विना हि रोहितं इंद्रो देवेषु पद्यते अ प्रथतदानयज्ञः किंएवः धीरः धीमान् सरं न वेमनसरं च वे
मचसंपद्यते न अग्रहो : कार्त्स्न्यमत्र विवादितं न विवत्वात : कारकानि भवन्ति तस्य रेवमकुविंदानी प्रसि
द्धो ॥ पयसा शुक्रं रयेन करणभूतेन शुक्रं यममृतं च जनित्रं आ जन्म स जनयतं अश्विनौ सरस्वती
च प्रकृतत्वादिंद्रस्य भैषज्यः सुरया च मूत्रान्मूत्रमिति साधु मत्रं रेतः स्वजनयंत किंयुय अपामतिंवाय
मानाः अमतिं अमनं मोदं दुर्मतिं च उवध्यं आमाशयगतं मलं वातं तस्य रुचिरं न सर्वं पक्वाशयग
तमप्सु चितदारान्न तदेतत्सुरया जनयंत आरान्तस्तु रामसन्निकर्षात् संविकर्षो हि गंथादिभिः इंद्रः सुत्रा
मा पयसा पुरोडाशदेवता इंद्रमभिषज्यन्तिइंद्रः सुत्रामा हृदयेन हृदयमिति विभक्तिव्यत्ययः इंद्रस्य ज
जान जनयति सत्यं इंद्रस्य पुरोडाशेन सविता जजान यतियकृत्क्लोमानं च जनयति वरुणः इंद्रमभि
षज्यन्मतस्ने च वायव्यैः ऊर्ध्वपात्रैः ऊर्ध्वपात्राणां सोमिकानां वायव्यानीति चोक्तं न मिनाति निस्सिमीते
सृजति आन्त्राणि स्थालीः स्थाल्यः आन्त्राणि अभवन् किं कुर्वाणाः मधु पिन्वमानाः पिन्वतिः सेवनार्थः
गुदाः पात्राणि अभवन् सुदुघा न धेनुः दोग्ध्री एणा आदिग्ध्येः गुदाः एव अभवन् शेषेन स्पचपत्रं स्मीहाम्

१८२

षन् शचीभिः कर्मभिः इंद्रस्य नाभिः उदरं च माता च आसंदी आसंदा स्योमिति [illegible] च्यते अन्तस्त
तो जायते ॥ कुंभो वनिष्ठुः स एवं तथा न कुंभो वनिष्ठुः जनिता जनकस्य शचीभिः स्वकीयैरेव कर्म
भिः यस्मिन् कुंभे अग्रे प्रथमे योन्यां गर्भः अंतर्मध्ये सराल दृण उषितः किंच प्लाशिर्व्यक्तः स्य
ष्टः शतधारउत्सः रूपः वक्तुस्त्रोतनत्वात् रूपउक्तः दुहे न कुंभी स्वधा पितृभ्यः मुखं सत ॥
अस्येंद्रस्य मुखं सत् एकदेशलोपः सत् मिति निर्णमेन यथावस्कृतिः मुखं सत् जिका पवित्रं च ष्य।
पायुः वालि वील इति शिरः इन् सतेन जिकापवित्रं अश्विनो आसन् आसन् सरस्वती च ष्यं च
भिषगस्य वालः वालिश्च शेफो हरस्मा न रस्वी वालस्य त्रिधा परिणामः वैद्यस्य वालिस्य शेफस्य यदि
नाम शेफो हरस्मा वीर्येण नरस्वी वेगवान् ॥ अश्विभ्यां चक्षुः अश्विभ्यां इंद्रस्य चक्षुः संस्क्रियतेत
देव अम्रमेतय्रतभ्यां छागेन तेजः चक्षुः क्रियते कथंभूतेन छागेन हविषा भूतेन हविर्भूतेन पक्के
न अपक्ष्माणि च इत्युषः लोमानि गोधूमैः संस्क्रियते कुवलैर्वदरविशेषैः स्तनानि विष्टानि प
क्ष्मरोमाणि संस्क्रियंते पेशो न शुक्रं असितं नमाते पेशोनरूपं च वदेषः शुक्रं शुक्लं असितं च
कृष्णं च वसाने आच्छादयेते प्रकृतत्वाद अश्विनौ ॥ अविर्न अविर्मेषः सारस्वतः नासिका हि
कायां वीर्यायावस्थितः प्राणस्य च पंथाः मार्गः अमृतः अश्विभ्यां सारस्वताभ्यां च क्रियेते
सरस्वती च उपवाकैः यवांकुर जातेन जनयितस्या ति नासिका अ भावाणि च वर्हिः वदरैर्जं

नयति ॥ इंद्रस्य रूपं इंद्रस्य रूपं संस्करोतीति ऋषभः बलाय यावति इष्टे कर्णाभ्यां च श्रोत्रं अमृतं अतीता
नागतवर्त्तमानशब्दग्राहिग्राहाभ्यां ऐंद्राभ्यां स्थापितं यवाश्च बर्हिश्च भ्रुवि केसराणि लोमानि
अभवन् कर्कंधु च जज्ञे मधु सारघं मुखात् कर्कंधु बदरं स्वयमेव जज्ञे इंद्रस्य मुखात् मधु ला
लाक्षादिमधुग्राहिणो चौते सारघं एव न सारघं सरघाः भ्रमराः यथा सारघं मधु इतस्त्र
तस्त्र आहृतं भवति एवं लाजादि सर्वं स्वादंगात् संभवति ॥ आत्मन्नुपस्थे आत्मनि उप
स्थे च यानि लोमानि लोमेति जातावेकवचनं मुखे श्मश्रूणि च यानि तानि व्याघ्रलोमके
शान शीर्षन् ये च केशाः शिरसि यशसे निहिताः याच श्रियै शोभायै शिखा निहिता यच्च त्विषि दी
प्तिः यानि च इंद्रियाणि तदेतत् सिंहस्य लोम ॥ अंगान्यात्मन् अंगानि यस्मिन् आत्मनि भिष
जौ वैद्यौ अश्विनौ समधातां तदात्मानं अंगैः समधात् सरस्वती एवमिंद्रस्य रूपं शतमा।
नवत् प्रतिमानं अश्विनौ सरस्वती च चक्रुः चंद्रेण हिरण्मयेन ज्योतिः अमृतं च दधानाः
सरस्वती व्यवहितपदप्रायः ॥ सरस्वती योन्यां इंद्रलक्षणं गर्भं अंतः मध्ये अश्विभ्यां पत्नी
भूत्वा सुकृतं शोभनं कृतं बिभर्त्ति धारयति तमेवेंद्रं जनयन् श्रियै विभूत्यै वरुणश्च अ
प्सु राजा अपां रसेन साम्ना च बिभर्त्ति ॥ तेजः पशूनां उपादानाय हविः इंद्रियावत्
वीर्यवत् उपादानाय परिस्रुता हविर्भूतया पयसा च हविर्भूतेन सारघं मधु म ।

धुग्रश्विभ्यांदुग्धंसरस्वत्याः भ्रमराः तेयथाभ्रमराः ओषधीभ्यः रसमादायइत्येवमेतेभ्याइ
वेभ्योग्रश्विभ्यांदुग्धंसौत्रामणीलक्षणंकथंभूताभ्यांभिषजांभिषग्भ्यांसरस्वत्याचकिंचसु
तासुताभ्यांपरिस्रुतायोभ्यांसकाशात्‌ मनः सोमइंद्रः इगयोएवंविधैः सौत्रामणीइष्टोन
भ्योनमोःश्विभ्यांसरस्वत्यैचएवमिथमराविस्कानिः ॥ इत्युवटकृतौ मंत्रभाष्ये एकोनविंश
तितमोध्यायः ॥ क्षत्रस्ययोनिरसि ॥ क्षत्रस्ययोनिरसि ॥ गायत्रीआसंदीदेवतोक्तपदस्थानि
ग्रहेवैनक्षत्रस्यवेयोनिः उमात्रिस्यानमसि आसंद्यामभिषिक्तोहिगुणधर्मानहेति रोजेति
एनभिप्रायोनिः त्वंक्षत्रस्यनाभिस्त्वनहनेत्वमसि कृत्स्नाजिनमस्यामास्तरणानित्वामाहिंसीः सी
नकृस्नाजिनमुच्यते मात्वाइयंआसंदीहिंसीः सीन माचत्वमाहिंसीः यत्राध्यासावकृस्नाजिनस्य
यत्रौवकृस्नाजिनयत्नस्यचचैवात्मनआहिंसीः मायेइतिश्रुतिः आसंद्यामुपविशतिनिषसादधृ
त्वातेपादयोरुक्त्याउपास्यतिमस्यः पाहिगोपाय मस्मुशाहेनाववकाहितिरुच्यते विद्योतनादि
विद्युतः पाहिअभिषिंचतिदेवस्यत्वाग्रात्मानम् अश्विनोर्भैषज्येनभिषजः कर्मभैषज्यमभिष
ग्वैद्यः तेनत्वाअभिषिंचामीतिसंबंधःपश्चिमत्स्यमित्यनुषंगः तेजसेब्रह्मवर्चसायचा ॥ सरस्वत्यैभैषज
नवीर्यायअन्नाद्यायअभिषिंचामिसरस्वत्याइतिषष्ठ्यर्थेचतुर्थी इंद्रस्येंद्रियेणवीर्येणबलाय
श्रियैयशसेचाप्यायाभिषिंचामियजमानमालभते कोसिमसाविदीकः प्रजापतिः आसिक

मं॰रा॰
भा॰
१८४

184

नमः प्रजापतिनमः अग्निमूर्तिपायार्थ्यं नमउपादानं च स्वा वो हि प्रजापतये कस्मै प्रजापतिपद
प्राप्नयेत्वा अभिषिक्तवान इन्द्रपतेः कायत्वा प्रजापतिभावायत्वां अहमभिषिक्तवान सिंहपतेः
स्वेष्माकेत्वाल व्योह्नः यातेरुद्रः कल्याणशा रुद्र कल्याणमंगल रुद्र सत्य राजन् सत्यः अग्र
स्वरः राजास्य अंगानि चालभते यथालिंगाशिरोमेवं चभिल्लते यायामहापन्ति स्यायव
सानान्नुष्टुभौत्वाः इन्द्रोभिषिक्तः सास्मानंशाह्रीभृतं ~~इन्द्रोभिषिक्तः~~ पश्यन्नाहशिरोमेश्री
र्वर्त्तते यशोमुखं वर्त्तते त्विषिर्दीमः केशाश्मश्रूणि च वर्त्तते राजा प्राणः मे अमृत
वर्त्तते सम्राड्चक्षुर्वर्त्तते संगतं राज्यं यत्र रसम्राड् श्रोत्रं वर्त्तते विराट् प्रथमः शोरी
जिह्वामेभद्रं वर्त्तते वाक्महः वर्त्तते भूणाकारिणी र्वर्त्तते मनः मन्युकोथफलदापिव
र्त्तते स्वराट् भामः क्रोधः स्वराज्यभामो वर्त्तते उरंच शक्तिरहतो विक्रम्यातिमानंचाह
हतिसेवकजनोपिप्रथ्येरहितोपिकामीजनातिविधिविंडवर्थिनं मोदाः प्रमोदाः अंगु
लयः अंगानि च मम वर्त्तते मित्रमे सहः मित्रं वलंमे सहः शत्रूणामभिभवितारं वर्त्त
ते वाहूमेनलं इन्द्रियं वर्त्तते हस्तौमे कर्मवीर्यं वर्त्तते आत्मा यत्तनूर्मा तन्त्रं वर्त्त
तेउरस्थमम पृष्ठीमे सहस्रपदे श्रोणिमेराष्ट्रं वर्त्तते उदरं च अंसौ श्रोचग्रीवास्वश्रोणी
वऊरूचअरत्नीवजानुनी च विशामे वर्त्तते अन्यान्यर्णगानितानियानिसर्वतनानो

भिन्नं नाभिन्नं विज्ञं विज्ञानं वर्त्तते विज्ञ विज्ञानयोः को विशेष इति चेत् विज्ञानं विज्ञप्तिः तज्जः सं
स्कारः चित्तं पायुर्मेऽपचितिः सत्त्वं च वर्त्तते पायुः जघनप्रदेशः अपचितिः पूजा भसत्तच्छहे
न स्त्रीप्रजननं गोऽश्वाः ऊः न च यजमानस्य तद्वत् निःस्पृशति कर्म पत्त्रि विषमेतत् आनं
दनं दोः आत्मा वर्त्तते भगः सौभाग्यं यशो वर्त्तते भगः महदैश्वर्यं सौभाग्यं समृद्धं पयः पस
निस्पृशति कर्म्मणः शिश्नमुच्यते जंघाभ्यां पद्भ्यां च धर्म्मः अस्मि धर्म्म प्रविष्टो हि राजा भ
वति विशि राजप्रतिष्ठितोऽस्मि ॥ क्षत्रात् जिनेव रोहति प्रतितिष्ठ इति यजुषा प्रतितिष्ठामि क्षत्रे प्रतिति
ष्ठामि राष्ट्रे प्रतितिष्ठामि च अश्वेषु प्रतितिष्ठामि च गोषु प्रतितिष्ठामि अंगेषु प्रतितिष्ठामि च आत्म
नि प्रतितिष्ठामि प्राणेषु प्रतितिष्ठामि च पुष्टे प्रतितिष्ठामि द्यावापृथिव्योः प्रतितिष्ठामि च यज्ञे ॥
त्रया देवा इति शस्तं तेजुहोति पंक्त्या अवसानया दैव्यापरेण च यजुषा स्वाहाकारान्तेन न च वषावरितप
दशाय येय एकादश देवाः त्रयाः त्रिप्रकाराः ये च पंक्तीकृताः त्रयस्त्रिंशत् त्रयस्त्रिंशत् संपद्यन्ते तत्रायसः
शोभनाय इति यत्तानां नाम राष्ट्रं व म्भेन येव बृहस्पतिपुरोहिता देवस्य सवितुः प्रसवे देवौ मामाः
देवाः देवैः वक्ष्यमाणैः सहसर्वे अवन्तु पालयन्तु माम् ॥ कथमवंतु प्रथमा देवाः द्वितीयैः सहिताः अवंतु द्वि
तीयाः तृतीयैः तृतीयाः सत्येन सत्यं यज्ञेन यज्ञो यजुर्भिः यजूंषि सामभिः सामानि ऋग्भिः ऋचः पु
रोनुवाक्याभिः पुरोनुवाक्या याज्याभिः याज्या वषट्कारैः वषट्कारा आहुतिभिः एवमेकादशसंख्याः त्रिः प्र

(२८
श्री·
पु·३·

मं॰ व॰
भा॰
१८५

185

कौवैद्वैः उप्रसोममं पालिना आकृतयो मे कामा न्समर्द्धयंतु भूः स्वकृतमस्तु ॥ यजमानोग्रहं मंत्रयति
लोमानि प्रयतिः अनुष्टुप् ममयानि लोमानि तानि प्रयतिर्विज्ञते प्रयतिः प्रयत्नेन त्वग्मानतिर्विज्ञते आ
नमने आनतिः त्वचि सर्वाणि मम भूतानि आनतानि नीच्छभिप्रायः आगतिर्म्मद्वादेः मांसं मे अ
नतिर्विज्ञते उपनमने तेह्वि मम भूतानि वसुथन अस्थि मम वर्ज्ञते मज्जा मे आनतिः इन्द्र उत्तरमवधः
मासरकुंभे स्नावयति यद्देवाः त्रिष्टुप् भोग्निवायुसूर्यदेवत्याः देवासः हे आमत्रिनिष्ठिस्याना
नश्चिह्देवान्संबोधयति यत्किंचित्त् हेदेवाः देवासः देवहेडनं देवापराधनं च कृमकृतवंतो वयं
ग्निः मां तस्मात् एनसः पापाद्विश्वात्सर्वस्मान्मुंचतु अर्द्धः हसस्त्रपापात् यदि दिवा यदि नक्तमेनांसि य
दिवा श्चो यनार्द्धः त्रिपापानि चकृम कृतवंतो यं वायुर्मा तस्मादेनसः विश्वान्मुंचतु अर्द्धः हसः यदि जाग
न् यदि जाग्रद्वस्थायां यदि स्वप्नावस्थायां एनांसि समानव्याख्याने स्तयोरिति विशेषः ऋतिस्त्र
लक्षण्याश्चाचक्षु मनुष्या वै जागरितं पितरः स्वप्नं मनुष्यकिल्बिषाच्चैवैनं पितृकिल्बिषाच्च मु
चंतीति यत्ग्रामे यदरण्ये यत्सभायां यदिंद्रिये इंद्रियविषये देवविषय इति श्रुतिः यत्
शूद्रे यदर्य्ये अर्य्यः स्वामिवैश्ययोः यच्छ्रपनद्दानि विंक्ष पुनः च किम वयं तिय चैपकस्याव्योः पत्नीय
जमानयोरधिधर्मणि अधिकर्मणि पुनः तस्येनसः अवयजनमसि अवदृवेयजिनाशने वर्त्तते ॥
यदापः व्याख्यानः अवभृथानितुं पुराव्याख्यानेयास्तु विशेषः अयद्दितियजनेनूहरूपयाने आया
दि

सिषमिति ॥ समुद्रेते हृदिपदाजिराद् स्तमिति त्रियानेन मन्त्रेणाञ्जलिना आदाय इमिति त्रियादेषं
प्रतिनिषिंचति द्रुपदादिव मुमुचान इत्यस्य हेवस्माबासोपासनीयाद्रुममयः पदः द्रुपदः पादुका
उच्यते तथा च यास्कः कनीनके च विद्रथेन वेद्रुपद इति मुमुचानः मुच्यमानः यथा द्रुमया
पदात् मुच्यमानः पुरुषः नग्नो हीयेरसंबध्यमानः पृथग्भवेत् यथा वा स्विन्नः पुरुषः
स्नातः मलात् पृथग्भवेत् प्रस्विन्नस्य हि कृत्स्नो मलः उपैति यथा च पूतं पवित्रेण कव
लमयेन आज्यं हूतं न पृथग्भवेत् कुण्डिकातः एवं आपः मां हृतं पृथक्कुर्वन्तु मामेनसः पापा
त्सकाशात् उत्तरति दुद्वयं अनुपश्यन्तो ज्योतिरुद्गात आख्यानेन संबन्धः उद्गताः उद्गता स्म वयं
तमसस्परि तमसोपचितमोवृहल्लादस्माल्लोकात् स्वः स्वर्गलोकं पश्यन्तः उत्तरं उत्कृष्टतरम
स्माल्लोकात् भो यदि देवं सूर्यं देवत्रा देवेषु उद्गच्छ ज्योतिः उत्तमं सर्वज्योतिभ्यः ॥ आहव
नीयमुपतिष्ठते आपो अद्यान्वचारिषं आग्नेयी योऽहं आपः अद्य अद्यास्मिन्नहनि अनुचारिष अनु
चरितवानस्मि स्नानेनाभ्यवकर्मणा यस्मादहं आनेन रसेन समसृक्ष्महि संसृष्टवानस्मि ज
वानस्मि यस्मादहं पयस्वानुदकवान् सन् हे अग्ने आगमं आगतवानस्मि तं मा मां आगतवन्तं संसृ
ज वर्चसा प्रजया च धनेन च समिधा मादन्ते एधोऽसि एधः समिधनमस्याग्नेः एवं चेत् अतः त्वा
सा धनमस्याग्नेः वयं एधिषीमहि आदधाति समिदसि इयतं अतः समिधनमस्याग्नेः तेजोऽसि तेजः ।

काष्ठसंयोगेनाग्निर्ज्वलतीत्येतदभिप्रायं अतस्त्वां ब्रवीमि तेजो मयि धेहि जहोति समावर्त्तन्ते ।
गायत्री यस्मात्समावर्त्तते तेन सोऽरत्वात्पृथिवी यस्माच्च समावर्त्तते एवं सूर्यः यस्माच्च समाव
र्त्तते एवं विश्वमिदं जगत्स्थावरजंगमादि अतः वैश्वानरज्योतिः भूयासं वैश्वानरज्योतिः भूयासं वै
श्वानरः पूर्वं यद्धोमात्कृष्टो मन्निबद्धिकाः विभूतिः विभूतानां कामान्व्यश्नवै भूयाभूः भवन
मात्राभिः संवर्थेमज्ञतमस्तु सौत्रामण्यारम्भे यजमानश्चाहवनीयं तिस्रः समिधोऽभ्यादधा
ति अभ्यादधाति मित्रेष्टुभिरनुष्टुब्भिः आग्नेयीभिः प्रथमामाज्ञानग्रहणी पापामेनामभ्यादधा
मि समिधं हे अग्नेऽद्य तपने त्वयि अनया ब्रतेन वृष्ठो वडुपगच्छामि ततः इन्धे त्वामहं दीदिनः स
नयं ब्रह्म यत्र च ब्रह्म मूर्त्तिमनन्तं च सम्यञ्चौ समीचौ इति प्राप्तेऽलिंगत्वात्पयः चरजः सह
ऋषिभिर्गतेन तं लोकं पुण्यं प्रज्ञेषं यज्ञानेवाश्नानां भवति अतः पतस्तल्लोकगमने प्राप्स्यन्ति येय
त्र देवाः सहाग्निनाचरन्ति यत्रेन्द्रः यत्रेन्द्रश्च वायुश्च सम्यञ्चौ संगतौ चरतः ॥ सह ऋषिवियु
क्तो तं लोकं पुण्यं प्राप्नुवाम यत्र सेन्दिर्न विद्यते अन्तालभन्ति मित्रसीदनेकानर्थ्यो मेदि अर्टः
मनानन्दितो मासद्वरासंधाने त्रिष्टुप् सोमस्याप्नुनालेन वहेस्तुरेशर्टः प्युः पच्यन्तां संयुक्ता
म् पयः षाचपयः पर्वणाच एबसं पच्यन्ता एवं नहृत्वागेथ सवसोमश्चावन्नलेशणक्र ।
समालिंगता मदायरसोऽश्चातः अनस्वरः श्नातः नमादतो सिंचति पात्रि अनुष्टुप्पैद्री वा

सिंचन्तियामाचमभावमुपगतांश्चावामेभक्तमंडः परिपिबंतिचपयः प्रभृतिभिः उत्सिंचं
तिचग्रहैः पुनंतिचयोवालपवित्रहिरण्यादिभिस्तस्यैतराथेवश्रेवभुवर्णोयेषघर्थेचतस्यै
मदेश्रवस्थितमन्त्रः इंद्रः किंत्वोवदतिकित्व इतिवदतिकित्वकस्यत्वत्रुहिइतिवदति यानाव
तकरंभिणं ऐंद्रीगायत्रीप्रातःसवनेपुरोडाशानांपुरोनुवाक्याधानावंतंधानाभिः संयुक्तंक
रंभिणंकरंभेणसंयुक्तंअपूपवंतंअपूपेनसंयुक्तंउक्थिनंवचनवंतंस्तुमितिभागाहेइंद्रप्रातः
प्रातःसवनेजुषस्वसेवस्वनः अस्माकं ॥ हूहरिंद्रायपेंद्राहाहूहमागायत्रीतिसाम्नस्त्रययोनिः
हूहसामइंद्रायगायतउपशब्दः यथयतहेमरुतः ऋत्विजोवामरुतः हूहहंतमेहूहत्रंप्रतिप्रतिश
येनहूतिगच्छतिइतिहूहत्रहंतमेयवमेवव्याख्येयंयेनैवंपदकारः पदंचक्रेहूहत्रहंतममितिमकारा
नोयं अयंकोर्थः पाप्मानंप्रतिप्रतिशयेनगंतारंसाममगायतीतियेनसाम्नाज्योतिरजनय
त ऋतावृधः सत्यवृधोवाइंद्रमयद्यावृतावृधः देवाः कथंभूतंज्योतिरजनयत् देवंदात्
देवायइंद्राययदातंप्रजागृविजागरणशीलंस्वाधिकारावहितंचिंत ॥ अस्मातमंत्रेणअप्सर्यो
अद्भिः ऐंद्रीगायत्रीहेअधर्योअद्भिः सुतमभिः पुनेसोमपवित्रेआनयआसिंच ततः
पुनीहिपुनीहिइंद्रस्यपानवेपानार्थं ॥ त्रयस्त्रिंशंवसाधदंरक्षातिन योभूतानांपंक्तिः सो
मप्रवादः योभूतानांचतः प्रकाराणांअधिपतिः यस्मिंल्लोकाः अधिउपरिस्थिताः यस्म

ईशो महतो विकारजातस्य स्वयं च महान्स्तेन गृह्णामि त्वां हे ग्रह अहमपि च परं ब्रह्मात्मभाव
मुपगतो गृह्णामि त्वा ग्रह ॥ उपयामगृहीतोसि स्वाव्यानम् अरतिनः प्राणभंत्वं भक्षयेतिश्रा
णयामे इत्यभिह्वाभ्यामनुष्टुब्भ्यां उपरिष्टाद्बृहतीभ्यां प्राणादिवपतिवयाघस्त्वप्राणायः ममश्र
क्षिप्रयानयास्वद्दक्षाणास्य श्रोत्रपान्त्रमेवाचक्षुमे विश्वभेषजः सर्वभेषजकारी मनसश्चा
पि विलापकः लीपश्लेषणे सर्वकरणेषु संश्लेषकः ॥ किंच अश्विनकृतस्य तेन कारउ
पजनः करोति दर्शनार्थः अश्विहष्टस्य ते सरस्वतिहष्टस्य ते इंद्रेण सुत्रामणा हष्टस्य ते उपहू
तस्याभ्यनुज्ञातस्य ताभिर्देवताभिरुपहूतस्य च सोमस्य अरतिविभिः भक्षयामि ॥ समिद्ध इंद्रः इ
त उत्तरं होत्रमैत्रावरुणं वसौत्रामण्याः आप्रम्भमेथात्र ऐंद्रस्य यशो रेकादश प्रयाजास्तत्रेतो
आप्रीयाष्टपैंद्रस्त्रष्टुभः यास्त्वाप्रीदेवताः इध्यातनूनपान्नराशंसः इंद्रे वै हिरदार उषासान
क्ता दैव्याहोतारा तिस्त्रो देवी त्वष्टा वनस्पतिः स्वाहाकृतय इति तायथायां विशेषणत्वेन
व्याख्यायन्ते हि स्थाने इंद्रोत्र यत्स्तूयते यः समिद्धः संदीप्तः आदित्यात्मना इंद्रः उषसां अनि
केमुखे उपसां हि यत्र भगवान् आदित्यो वर्तिष्यतो उरोरुचा अग्रतो गामिन्यादीप्या वा ह्वयानाः ॥
इति संबंधः पूर्वकृञ्च पूर्वां दिशं करोति तदुदयाय पलदिता हि पूर्वा दिग्भवति स एव मध्यस्थान
स्थानतराभिर्देवैः सहितः मरुद्भिः स्नाताच सहितः वज्रबाहुः वज्रपाणिः जघान हतं मेधं विदुरोवाचा

रहत्वाचहृत्रववावारविहृत्वानकरोतु उरः हृारागिस्वोत्वाभिनस्यैवमेतस्य हारशाहू स्पउरइतिहंृ
दसंसम्यक्सारणम् ॥ नराशंसः सपकस्तामेवज्ञतिभिः नराशंसः नृत्नपाञ्चाभिन्नाग्नीणाम्
नुवाकेत्रवह्नितपदम्मायोयमेत्र ः यः स्मूररंइद्रः ॥ नराशंसः सः स्वयज्ञोभवतिनराश्रस्मिन्ना
सीनाः सोऽंठ संनीतिप्रतिभिमानोगणयनूयज्ञस्यथामस्यानेगोप्रभतिपञ्चसंवेथिनीभिः
वपावान्हिरण्येयथापूर्वंपम्बवदानभूतेष्वडीष्वंडकितिहिरण्यनामयश्चमूररंइद्रः तनू
नपान्नहुतेभवतिमधुनामधुस्वादेनाहुतेनसमंजनन्हवींर्टः त्रिगोरत्रतनूउच्येनतपा त्र
स्पागोगेः तस्याः पयोजायतेपयसआज्यंजायतइतितस्मरमिदंयजमानोयजतिप्रचेतनाः प्र
कृष्टज्ञानः ॥ ईडितोदेवैः ईडितः पूजितोदेवैः हविष्मान्हवींइद्रस्तमग्नेतदभिप्रायो
मत्रोवर्णाभिप्रायोवाअभिष्टिः अभिष्टुतवान् अभ्येषणावान्वाआजुह्वानः आह्वयमा
नोहविषानिमित्तभूतेनशर्हमानः अभिवलायमानः शर्हइतिवलनामपुरंदरः पुर
हारयितात्रभित्तमेघान्भिनतिहस्तार्थंवज्रबाहुः यः सआयातुयज्ञमुपतोजुषाणः प
तेनः सवेथिनउपसेवमानः ॥ जुषाणोवर्हिः जुषाणः सेवमानोवर्हिः हविष्मान्हवीअ
र्थेनाताभ्यांसंयुक्तः नः अस्माकंइद्रः प्राचीनप्रागंचनसीदतुसीदत्वासांदिशाउपादिश
न् पृथिव्याः देवयजमानत्वेनउप्रथ्याः उरुविस्तीर्णंप्रथनमस्यातिउरुप्रथाः इंद्रवि
रुद्गविशेषणामितिवर्हिविशेषणाप्तन्त्रराणिप्रथमानेस्योनंमुखंरूपंस्मादिस्यै फलेवसुमिस्रुविर्हिषींजनमेकेरा
न्नोहिरण्यवंवसवस्त्रसंनेतदजिह्मायमेवत्र संवर्हिरक्तंहविषाघृतेनसमादित्यैवसुमिरित्यये तत्रःसजोषाः

मरुत्वप्रियमाताः ९१

शोषणं इंद्रं उरः संप्रसारणं क्रोडं दसं यज्ञगृहद्वारः कवष्यः कुषंतिः कर्षकुषिताः सतृषिताः याव
मानाः आद्रवन्तः हृषाणं वर्षितारं यं तं जनयः सुपत्नीः लभ्यमानमेनं तं जाया इव शोभनपत्न्यः
अग्रे इंद्रं संगतिप्राप्य यज्ञगृहद्वारः देव्यः अभितः इतस्ततः स्वविश्रयंतां विश्रियंतां सुवीरा ऋत्विग्भिः
वीरैः इंद्रं प्रति प्रथमानाः पृथ्व्यो भवंत्यः महोभिर्महोत्सवैः ॥ उषासानक्ता उषाश्च आदित्यप्रभा नक्ता रा
त्रिः उषाश्च रात्रिश्च बृहती महत्यौ बृहंतं महांतं पयस्वती उदकवंत्यौ आवश्यपायवत्यौ सुदुघे सा
धुदोहने अस्मै इंद्रं तंतुं तमलं भ्यापमानमेनं तं तंतुमिव ततं पटार्थं सूत्रं प्रसारितमिव पेशसा वि
चित्ररूपेण सूत्रेण संवयंती संग्रथयंत्यौ देवानां देवमिंद्रं यजत्रः संगतिं कुरुतः पुनर्वर्द्धयतः इ
र्थ्यः सुरुक्मे सुरोचने ॥ दैव्या मिमाना अववहिपदभायो मंत्रः दैव्यौ होतारौ प्रयंयक्षाद्भिः अमौ च वा
युर्मध्यमः दैव्यौ होतारौ मिमानौ निर्मिमाणौ यज्ञमनुषतद्धितलोपो वीप्सायाम् मनुष्यस्य
मनुष्यस्य यजमानाय पुरुत्रा बहुप्रकारं प्रथमौ मानुषस्य होतः सुवाचा साधुवाचौ मूर्द्धानि यथा
नांगयज्ञस्य इंद्रं मधुना अक्त्वा सहितं दधानाः प्रथमास्या पायं प्राचीनमाहवनीयाग्निं ज्योतिः ह
विषा हृद्वानः वर्द्धयतः तिस्रो देवीः याः तिस्रो देव्यः हविषा आज्येन वर्द्धयमानाः इंद्रं जुषाणाः
सेवमानाः जनयो न पत्नीः जाया इव पत्न्य आसनेनाच्छिन्नं ततं अविस्रस्तं यज्ञं पयसा हवि
षा कुर्वंत्व कतमास्ताः तिस्रो देव्य इत्यत आह सरस्वती च इडा च देवी दानादिगुणयुक्ता ॥

भारतीच आदित्यप्रभा विश्वमूर्तिः सर्वतः तत्त्रयायिनी आख्यातम अत्रता स्यनो ध्याइतम् ॥
त्वष्टारं यज्ञ त्वष्टा तद्देनेक रोमर्थं स्ययत्त्वष्टा रथम्नु थारयन्म्पुष्वं वलम् इंद्राय इंद्रायंथे वृ
ष्णे रेसे क्रे कर्थं भूतः त्वष्टा अपाकः पाक इति प्रशस्यनामानविघ्नेन पाको यस्मात्त्वष्टृ व
सः पाकः प्रशस्यः सोपाकः तत्रो स्यर्थानां चोत्त्ररपदलोपः अविष्टः अस्यानशीरः अ
वनशीलो वा यशसे च इंद्राय वृष्णे वह्नतिभेषज्यं यकरोदितिशेषः वृषासेक्ता त्वष्टा
यजन्न वृषणं सेक्तारम् इंद्रं भूरिरेताः सर्वजनकस्त्वष्टा समृद्धं नियत्त्सआहवनीये संश्र
नङ्क्षपथ्यनुद्धविः सहितेनात्मेन देवान् अनक्ति भोजनार्थं आहवनीयात्मना यस्मि
तान्भोजयितुं देवानित्यर्थः वनस्पतिरवसृष्टः वनस्पतिर्यूपः अवसृष्टो न अभ्यनुज्ञातः त
इव पाशैर्बद्ध मस्त्रथुर्भुणापशुत्मन्ना आत्मना समंजन् संगमयन् सेव आत्मकथामिव शा
मितान देवः यथा शमिता देवः अपापः पशुं वहमानात्मना समं मेये देव लिंचं इंद्रस्य जठरस्य
दर्द्धे प्रीणन् इरयन् स्वदाति यज्ञ समन्न क्रृयागमधुनाचरसे नहोतनवा लोकान्
मित्रु वपालोकानां संवर्धिनं इंद्रं प्रतिपद्यते सोमसंस्त्वस्तदभिप्रायमेतत् गमनाय य स्तूरः विक्रा
तरिंद्रः कृषभायमाणः वृषइव आचरन् वृषभः सर्वलोकत्रासकृन्नरराषाडिन्द्रं सहते अभिभव
तीति नराषाट्स इंद्रः स्वाहा कृतिभिर्माच्यतात्पातिसमुच्चयः हूतस्पाचवहमावयेनचमनसामी

मे॰ च॰ भा॰ १८९

दमानाः हूयंतः स्वाहाकृतिभिर्देवाः अमृताः अमरणधर्माणः मादयंतां तर्पयंतु ॥ आयात्विति ष
ड्विष्टुभः ऐंद्रस्य पशोर्वपायाः पुरोडाशस्य चानुवाक्या आयात्विंद्रः अवसे अवनाय तर्प
णाय रक्षणाय वा उप नः समीपेऽस्माकं आगच्छतु ततश्चेहास्माभिः स्तुतः सधमात् सहम
दनः सहभोजनः अस्तु शूरो विक्रांतः वावृधानः वर्द्धमानः स्वबलैः तविषीर्यस्य पूर्वीर्द्यौन
तविषीति बलनाम तवतेर्वृद्धिकर्मणः यस्येंद्रस्य बलानि पूर्वीणि यत्रवथादीनि द्यौरिवा
द्यौः कथ्यते यस्मात्स्मदीयं क्षत्रं अभिभूति अभिभवितृ अभिभवनशीलमपि पुष्यात्पुष्णा
ति स आयात्विति संबंधः ॥ आ न इंद्रः आ उपसर्गा आसाद्धियमेनेनं संबध्यते यासात् आयातु
नः अस्माकं इंद्रः दूरात् द्युलोकादेः आ न आसात् अस्माकं आसादं अंतिकनाम आगच्छतु वा
स्माकं समीपात् यद्यपि दूरे व यद्यपि अंतिके इत्यर्थः अभिष्टिकृत् अभिलषितपदार्थः कारी
अवसे अवनाय यासत् उग्रः [illegible] विषमः पत्यच ओजिष्ठेभिः ओजस्वितमैर्बलैरुपेतः नृप
तिः वज्रबाहुः संगे संग्रामे समत्स्वपि संग्रामनामैकस्मिन्संग्रामे बहुषु च
युगपदुपस्थितेषु तुर्वणिः तूर्णवनिः विनित्संभक्ता हंता पृतन्यून् संग्रामयतः शत्रून् आ स्त
नदेशं प्रति अस्मान् अभिमुखं आगच्छतु एव मा गच्छेति पूर्वेण ॥ ऐंद्री त्रिष्टुप् यमेव मनेन प्र
कारेण हृत्स दस्ररगः इंद्रमः हविष्मंतं वर्षितारं वज्रबाहुं वसिष्ठः सः वसिष्ठस्याप ॥

१८९

189

॥ इंद्रः त्वा पातु वः त्वस्मान्निइंद्रुः हरिभिः हरितवर्णैः त्वमेवैः त्वस्य त्वद्दृष्टो त्रे दर्ये मचन्त स्मात त्ये त्वन्त

वीचीतः त्वं वीतंचनः त्वपसे त्वं त्वायराधसे त्वघनाय चक्रातास्थी शत्य चत्ति क्षत्तिनि क्षनु वज्रीम

घवावघन वातू विदप्सी विरमसापीलः इ मंय ज्ञं त्वनुपू ति नः त्वस्माकं वाजसातौ त्व

त्वमं नजनतिविन्न नूने । त्वा त्रातारमिंद्रुं त्रातारं संहवे त्वा तारं इंद्रं प्रतिदं यत्तः क्ष पयः त्रिभूरं

विक्रं तं यत्तः त्वं विनारं इंद्रं कपयं तिह वेह वेसुह वं त्वा ह्वाने त्वा ह्वानेशो जनाह्वा

नं इंद्रं यत्तः क पयंति भूरं विक्रं तं यत्तः क पयंति जनाः त्वन्तः ह्वयामि शक्रं शक्रं पुरु

हूतं वज्रिणि राह्वानं इंद्रं मवन्ता ज्ञनः मनस्वस्तिनः त्वं विनाशायत्वस्माकं मघ

वोधनूवानूधातु दधातु इंद्रः इंद्रः सुत्रामा इंद्रः साधुना गाः स्ववान् धनवान् त्वं

वो निश्वैः सुमडीकः शो मनमुवकारिन्नवतु विश्ववेदाः सर्वे धनः किं चवा धत्तां

त्त्वपराजयत्नु द्विषः शौर्णाद्यत्रन्नन्नयंचक्रे दुर्ल्लस्तमादांच्च मुवीर्यस्य घनस्य मनयः स्यामनम
वमंतस्येंदुस्यमुचोद्धन्नः वयं मुमनौकल्याना मनौस्यामयज्ञिमस्यपज्ञमं पादितः त्वपिवास्यनद्धेभं
दृतीये सौमनसे कल्याणे मतासिस्याम वयं ततो नुगृह्य बुद्धौ वर्त्तमाना तां नांन्त्वस्मा कांम मुत्रा माशो मनत्राराः
न्चवातध तुवान्रुड्ढः त्व मे त्वममतः त्वागाच्चिड्राद्दपि दृं बोदौर्गायं प्रकाटं कृत्यायुपोतु दृष्या क्तारोनु
ज्यामद्रैः त्वहत्यैदुं त्वाप्याहिमंदुैः मदनीयैः क्रेदेद्र हरिजिह्वरित्नवर्णोः त्वमे वेभ्यूरसोमनिः वत्तवे वहृत्पश्चाः
किं समात्वा के गृत्निपम स्वित्नपाशितः मांच त्वांन्त्वा गच्छेत्तं को चित्रिवपूतुविनिवि
तिशकुनिनामशकुनि निवघात्त्र पत्तिवंहाकान्त्वा स्वेहितः त्वपयके गृत्तिमारियं
पिनो नवेयुः त्वनिघत्ये वसां ड ढि तत्तीय्या नानुड ढिन्त्वा गच्छ कपनि वा
धन्वड्वयपा धन्वितन्तनुदकाः ॥ ॥ ॥ ॥ ॥

189

त्वा निवहन्ति यद्वा वसुसमाहरणाय: अभ्यर्चंति अभिष्टुवंति: अकर्मैत्रैः सन: सोऽस्मभ्यं दत्त:
वीरवत् साधुपुत्रसंयुक्तं यावद्दद्यात् धनं गोमद्व गोसंयुक्तं च एवं त्रिभि: पादैः इन्द्रमभिष्टु
त्वा: अथेदानीं यजंयंति ता नाह यूयं पात पालयत स्वस्तिभिरविनाशैः सदा कालं नः अस्मान्
इत उत्तरं त्रिपञ्चनाध्यायात् तत्र द्वादशाद्या अनुष्टुभोऽश्विसरस्वतीन्द्रदेवत्याः समिद्धः संदी
प्तोऽग्निः हविर्वहनसमर्थः हे अश्विनौ किंच नग्नाथर्मः प्रवर्ग्यः विराडसि सुतः सोमोऽभि
षुतः किंच पुरु प्रशरयति च धेनुः सरस्वती सोमं मधु संसृजत्युहः इन्द्रियं वीर्यं अश्विनावध
यूं तयोर्हि ता कथयति यज्ञसंपत्ति ॥ तनूपा भिषजा तनूनपाता शोभिषजौ च सुतेऽभिषुते
सोमे अश्विनाउभौ सरस्वती च मध्वा रसेन रजांसि शरयन्ति इन्द्राय भोगपालोकार रजांसि व
ते इति ह लोकवचनो रजःशब्दः इंद्रियं वीर्यं इन्द्राय आयतनाथ्यं पथिभिर्मार्गैः अंतरिक्षं वह
तु इन्द्राय इदम् इन्द्रार्थं इन्दुं सोमं नग्न सरस्वती अभिषुणोति ति वाक्यपरिशेषः नराशंसेन य
तेन सहिता नग्नहुतः किं एवं किंच अथ तामस्याय अश्विनो मधुरसे रूपेभेषजं रूपं च भिषजौ वै
द्यौ सुते अभिषुते सोमे इन्द्राय इन्द्रनुषंगो विभक्तिव्यत्ययेन प्रभृती ति वीर्यं च वीरकर्म इन्द्रमभिषु
न्तियाभिर्हेन भूताभिः अश्विनौ च सहाय भूतौ युपादाय संदधुः ऊर्जं च नत उपसेवने दधा
दिसंदधुः संदधुः धनम् ॥ अश्विना नमुचेः यमश्विनौ नमुचेत्राय न्समुतमभिषुतं
स्मा सुत्रामा व्यापाय तौ शरस्वती इन्द्राय इंद्रियायदधिम वह्नु: ३

मं॰ब्रा॰
भा॰
१९॰

सोमं अमृतममलिनं परिस्रुता सहितं स्यापिबन्त्वश्विनौ सरस्वती नमे चाभरन्त बर्हिषा स्तरणार्थेन
सहिता इंद्राय पातवे इंद्रपानार्थं ॥ कवष्योनकवष्य: यत्र गृहद्वार उच्यते कवष्योन कुर्वति:
कवष्ये मम त्वया स्थीयो न कार: अस्याम्रचिसत्विरास्त्रबकवनवज्ञ: न अश्विभ्यां वायुभ्यां सहिता
द्वर: द्वार: दिश: द्वाभिर्हिंप्रोलद्वंपनइत्यनपवमन्के इंद्रान: इंद्रस्य यास्तद्वा: सव्यवस्थित:
रोदसी द्यावापृथिव्यौ उभेअपि द्वेदे शिपकामाश्च सरस्वती इह इंद्रायतायत्र गृहद्वार इदंना
माकुर्वन्त्विति शेष: ॥ उपासानक्त उपाय्यादित्य प्रभानक्ता रात्रि: हे अश्विनौ उषा च रात्रि: अ
दिवा अहनि इंद्रं इंद्रिये वीर्ये: समंजाते समदयत: सा यंच इंद्रिये ससमंजाते त्वं तस्याभिप्राय
संजानाने संजायमाने पकमति भूते उषा च रात्रि अपेशसा स्वरूपमुक्ते उषा: कृष्णेन रात्रि: कि
सिं इंद्र उषा च रात्रि: अकेवलेपवसमंजाते नेत्याह सरस्वत्या च समंजाते ॥ पातन्न: पालयत
न: अस्मान् हे अश्विनौ दिवा अहनि पाहि पालयच नक्तं हे सरस्वति त्वंचहे देव्यौ होतारौ भिषजौ पालयतम:
अस्मान् हे भिषावासहेमर्थ: सुतेअभिषुते सोमे ॥ तिस्त्रस्त्रेधा तिस्रो देव्य: सरस्वती च मध्यस्थाना भारती आ
दित्य प्रभा द्युस्थाना इडा पृथिवी स्थाना पतास्त्रिभुस्थाने भुस्थिना: अश्विनौ च ती त्रेपद्वनमपरिस्रुता सहितं सो
मं इंद्राय सुषुवु: अभिषुतवंत: मदं तर्पणं अश्विना भेषजं मधुरितिपतदाख्यात सगादङ्गरिति विपरिणाम: केसम
दध: अश्विनौ सरस्वती च तस्या व प्रयाजदेवता: किमदध: अश्विनौ तावद्भेषजमधुरूपं भेषजं च न: अस्माकं सुवंपि सरस्वती
तस्याचयप्रा: श्रियं रूपंचकस्मिन्नदधु: १९॰

इंद्र एकस्मिन्नवसरे सुतेनभिषुतेसोमे ॥ अतएवेंद्रः अनाहतो कालेकाले इंद्रायेति विभक्तिव्यत्ययः
वनस्पतिः शासोमानः सुचंपरिस्रुता साधनभूतया कीलालं अन्नरसं दुहे इत्यनुषंगः अश्वि
भ्यां च सहितामधुकुंभेदोग्धि यथेनुः भूत्वा सरस्वती ॥ गोभिर्न्न गोप्रभृतिभिः पशुभिः
सोमं सहितं मासरेण परिष्कृता च कथंभूतं सुतं मधुमंतं अभिषुतं मधु स्वादु हे अश्विनौ युवां
समर्थानं इंद्रो किं केवला वाश्विनौ समर्थानं तेनेत्याह सरस्वत्या सह स्वाहा स्वाहाकृतिभिः
प्रयाजेन सार्थं ॥ अश्विना हविः तिस्रो वपाना यानानुवाक्याः अनुष्टुभः एकैका अश्विसरस्व
तीइंद्रदेवत्याः अश्विदेवत्यनेनाख्यानपदेन सर्वाणि पदानि संबध्यंते अश्विनौ च सरस्वती च
आजभ्रिरेहविरिंद्रियं वीर्यं आसु कंतनिलिं नवसुषंनमद्यमहतीयंकृतः आजभ्रिरे नमुचेः
आसुरात् कयाहेतुभूतया आजभ्रिरे यिपा बृहद्यासके आजभ्रिरे इंद्राय ॥ यमश्विनाय
मिंद्रं अश्विनौ च सरस्वती च हविषा वर्धयतं सविभेदभिदिशावेदारणे विदारितवान् व
लमर्यं वृणोतेर्वलं मघं महनीयम् नमुचौ आसुरे सचा सच सहशब्दवचनः सघोमाख्याविं
भक्तिव्यत्ययः नमुचिना आसुरेण सहवलंविभेदेति नमिंद्रम् नमुकगुणानिंद्रपशवः
कर्मागभूता गोम्भवाजाः सचा सहभूताः अश्विनौ च उभौ सरस्वती च दधानाः पारयंत
अभ्यनूषत अनूषत तिर्दधात्यर्थः अभिवर्धयेति केन हविषा कस्मिन्यज्ञे इंद्रियेः वीर्यैः ॥

मं० त्र०
भा०
१९१

यइंद्र त्रिस्रोनुष्टुभः पञ्चपुरोडाशानांयाज्यानुवाक्याः इंद्रसवितृवरुणदेवत्याःसर्वाः येइंद्रेंद्रि
यद्युः स्थापितवंतः सविता वरुणः भगः भगशब्दैमात्रैंद्रोलन्ह्वनेनयजमानेपिवीर्यंदध
तीतिवाक्यपरिसमाप्तिः सुत्रामाइंद्रः हविः पतिः हविषः स्वामी सयजमानमितिविभक्तिव्य
त्ययः सुष्टुतसचनामितिष्टुत्वचनव्यत्ययः पवमानेविषमानंमात्यालन्वरणायाव्याख्येयाः सवि
तावरुणः द्वितीयोर्द्धर्चः प्रथमोव्याख्येयः यत्रअत्रैवतेनमघेकाशात् वसुधनंवलंइंद्रियं
सुत्रामाइंद्रः ततसविताववरुत्रामाचदधानाः इंद्रेयजमानेवायत्तसौत्रामण्यांप्राशितवान् प्रव
तः किंकिंदधानाः वरुणः क्षत्रंइंद्रियंचसविताभगेनधनेनसहितानिश्रियंसुत्रामायशसासहि
तेवलम् ॥ अश्विनागोभिः त्रिस्रोनुष्टुभः हविषोयाज्यानुवाक्याः अश्विसरस्वतींद्रदेवत्याः अ
श्विनौसरस्वतीचगोभिः गोप्रभृतिभिः इंद्रियंइंद्रियेणेतिविभक्तिव्यत्ययोवाक्यसंवधात्
अश्वेभिः अश्वदक्षिणादिभिः वीर्यंवलंवीर्येणवलेन हविषापञ्चपुरोडाशेनइंद्रंयजमान
चअवर्द्धयन् तानासत्यातौनासत्यौनसत्यावेवसुपेशसासुरूपौहिरण्यवर्तनीहिरण्यदाने
पलक्षितपंथानौनवासरगुणणशुक्रौ नकारोवा सरस्वतीचहविष्मतीहविषासंयुक्ता पते
त्रस्याःपादाःपरोक्षकृताः चतुर्थस्तुपादः प्रत्यक्षकृतः अतोवाक्यभेदः तौनासत्यावुरुगौ
सरस्वतीचकर्मस्ववर्त्तमानोः स्मानवतअवेतिवचनव्यत्ययः ताभिषजातौभिषजौसुकर्म

१९१

१९१

तीड् देवत्नौ युवं युवा निनिवि नन्ति भस्य यः भस्वती द्विति तीयायूपंङ्के न्मश्च्रिसस्वस्य:

णा कल्याणकर्मणो सा च सरस्वत्या साधुदोहना सरस्वती च वृत्रहा शतक्रतुः वज्रकर्मा इंद्राय दधुः
दधुः इंद्रियं वीर्यमन्नं सह वृत्रहा शतक्रतुः इंद्राय दधुरिंद्रियमितिं इंद्राय ददाति त्येतन्त्रा यपय
ते कल्याणतरीणं इंद्र पतत्कल्पम भवाय ददाति ग्नदोषः विभवो वाद्देवा अचिंत्यशक्तयः एकथा
द्विधा वक्रधा भवेयुः एवमन्यत्र विरोधाः परिहर्तव्याः ग्रहणं याज्यानुवाक्ये ॥ युवं सु
रामे पुत्रमिव पितरौ अनुष्टुभो अश्विसरस्व... सुरामे सुराममयं नमुचौ आसुरे वर्तमानं सचा
सह विविपिपानाः विविधं पिबन्तः कर्मसु वर्तमानाः इंद्रमवतमपालयतं ॥ पुत्रमिनपितरौ
वाख्यातम् पशु स्विष्टकृतो यस्मिन्नश्वासः इति जगती त्रिष्टुप् वाग्नेय्यो यस्मिन् अश्वासः ऋष
भासः उक्षणः वशाः मेषाः अवसृष्टासः अवदायावदायं च तत्र स्वत्रैर्नि दितमाः आहुताः अव
यावदायं हुताः तस्मै अग्नये कीलालपे कीलालमन्नं रसं पिबंतीति कीलालपाः सोमपृष्ठा
य सोमाहुताय यस्य पृष्ठे हूयते वेधसे मेधाविने हृदा मतिं जनय हृदयमतिनिश्चयं कस्तोमं
जनयचारुमग्नये अहासाग्रेयस्य तेनेव अस्य सेमुवदेहेअग्ने अहावि हुतं मया हविः कथमि
यष्टचीवह्नतं यथा सुचिनित्यावस्थिते पृतं च वीवसोमः चरभिव यथा च अविषवेणाचमा
णानित्यावस्थितः सोमं एवं तं त्वाब्रवीमि वाजसनिं वाजमन्नं संभजते वाजसनिरिति यथनं।
असे अस्मासु सुवीरं शोभनवीरा अस्मि निरिति सुवीरं प्रजासं यतः दिहि स्यापयय यशसं व यशाद्वे

मं त्र भा० १९२

192

सोमोराजा हृद्दंतेमहान्तंअश्विनातेजसापकादशशंसंअयानुष्टुप् अश्विसरस्वतींद्रदेवत्या च द्विती
यायाम्नय:त्वेोगायअअश्विसरस्वतीइंद्रदेवत्यायथासंख्यं अश्विनाअश्विनौ तेजसासहचक्षु:
प्राणेनसहवीर्यंसरस्वतीचावाचसहबलेनचसहचेद्र: एवमेतादेवता: प्रतिनियतचक्षुरादिद्वा
नद्वारेणइंद्रायदधु: दत्तु: इंद्रियं ॥ गोमद्धुणाहेनासत्यागोमद्वनेसंगृह्यउभयपदवृद्धौ अ
श्ववद्वर्चनसंगृह्यवानवाहनं हे अश्विनौ अश्विवर्न्नत्याप्रसिद्धेन मार्गेण हेरुद्रा गलरुद्रवणमा
गीतपाथं प्रतिसंदेवनतायस्मिन्यज्ञेपिबतिसत्पायम: ॥ नयत्पर: नयत्परत्नपर: असेव
ह: आदधर्षत: अप्रधृष्यात् अभिभूयगृह्णीयात् हेवृषवसू वर्षणंवृष्टिर्ययो: वसुध
नौ तथोक्तौ यद्वा वृष्टिद्वारेणवासयितारौ उ: सोर्द' मंउहमसहृत्तेशसतिय: सनथोक्त: म
त्र: मनुष्या: रिपु: शत्रु: ॥ तान: योपुर्वोवोउक्तगुणौतौन: अस्माकंप्रवोढम् आवहतंहेअश्वि
नौ रयिंधनं विसोतासहरशाम् अनेकरूपसंदर्शनम् हेधिस्यातिस्त्रूपौददातारौवा परिवीवि
दम् धनविशेषणमेतत् वरिवइतिधननाम यल्लब्धंतद्धनलाभस्यहेतुभूतंभवति ॥ पाव
कान: पापावकापावयित्रीसरस्वतीवाजेभिरन्नै: वाजिनीवतीअन्नवती सान: अस्माकंयज्ञं
वष्टुकामयताम् ॥ योहियदिच्छतिसतदागच्छतिधियावसु: कर्मधना चोदयित्रीयाचोदयि
त्रीप्रेरयित्री सूनृतानांशोभनानांअस्तानांवचसांत्रयीलक्षणानांबाधिभवस्यचादयित्रीत्रय:

१९२

साचेतंतीचेतयमानाशोभमानानांमतीनांबुसांयतंदधेसारयतिसरस्वती ॥ महोअर्णः यामह
न् अर्णः महान्तमुदकसंघातं सरस्वतीप्रचेतयति प्रज्ञापयति केतुनाकर्मणाप्रज्ञयावाम
धस्यामानदीवा याश्च धियः बुद्धीर्विश्वाः सर्वाः सर्वप्राणिगयवस्थिताः विराजतिदीप्य
ते: अत्रभोविनतगणार्थश्च द्रष्टव्यः विविधंदीपयतिप्रकाशयतितेनावयंनुमइतिशेषः इ
न्द्रायाहि ॥ इन्द्रआवाहिआगछ चित्रभानोचित्रदीप्ते किंकारणंसुताः अभिषुताइमेसोमाः
त्वायवः त्वांकामयमानायद्वेनामेंद्रेरस्मात्पिवेदिप्येवंकामयमानाइत्यर्थः नचाभिषुताएव
केवलंकिंतर्हिअण्वीभिस्तनापूतासः अण्व्यइत्यंगुलिनामाअंगुलिभिः तनाचधनदाने
नचपूताः पवित्रीकृताः यद्वा नानाशाद्वेनदशापवित्रमभिधीयतेंगुलिभिर्दशापवित्रीकृ
ताः यद्वा ननाशद्वेनदशापवित्रमभिधीयते अंगुलिभिर्दशापवित्रेणचपूताइत्यर्थः
इन्द्रायाहि इन्द्रआगछधियास्वकीययाबुद्ध्याइषितः प्रेरितः अनन्यप्रेरितइत्यभिप्रायः ॥
विप्रजूतिः जूतिर्गतिः प्रीतिर्वाभेधाविनुगतः सुतावतः अभि[illegible]तवतोयजमानस्य य बुध
ज्ञे किंकारणमितिचेत् उपसमीपब्रह्माणिहवींषिवाघतोवन्नते उपश्रोताशान् अ
त्विजोवन्तइत्यर्थः वाघतइतिऋत्विङ्नामसुपठितम् ॥ इन्द्रायाहि हरइन्द्रआगछ तू
तुजानइतिक्षिप्रनाम क्षिप्रंत्वरमाणाःकृत्वागछेति उपब्रह्माणि उपहवींषि वि

मं॰उ॰
भा॰
१९३

प्रति हेह्नरिव: हरीश्मश्रो तहातिंद्र: मनुषसोम: संवृद्धाविति हतम् पत्यच सतेमिषुतेसोमे
दधिषु उदरेण धारयस्व न: अस्माकं सवभूते च न: अन्नं हवि: सोमो लक्षणम् ॥ अश्विनापिव
ताअश्विनौ पिवतां मधु मधुरसस्वादोपलक्षितं सोमं सरस्वत्याच सजोषसा समानसोमपानौ
इंद्र सुत्रामा वृत्रहा पिवतु मधु तेनाभूयोभूय: अश्विसरस्वतींद्रा: जुषंती सोम्यमधु ॥
इत्युवटकृतौ मंत्रभाष्ये विंशतितमोध्याय: ॥ ॥ आनंदपुरवास्तव्यवज्रटात्मजस्य
उवटेन मंत्रभाष्यमिदं कृतं भोजे पृथ्वीं प्रशासति ॥ शुभमस्तु

193

५२०८

यजुर्वेदसंहितताया उवट भाष्यम्